24425

CENTRAL LIBRARY, BARODA.

SANSKRIT SECTION.

Acc. No. 11533 Subject मीमांसा

Name a जैमिनिसूत्र भाष्य b जैमिनि न्यायमाला [illegible]

Author a वल्लभाचार्य b. [illegible]

Age

Extent a 14 250 b 27 500

Language s Script n

181- पाद 1 द्वितीयाध्याय [illegible]
[illegible]

बंध २९

जैमिनीसूत्रभाष्यपत्र १८

24

॥श्रीकृष्णायनमः॥ ॥श्रीवल्लभनंदनोजयति॥ ॥भावार्थाःकर्मशब्दास्तेभ्यःक्रियाप्रतीयेतैष।
ह्यर्थोविधीयते।प्रथमेध्यायेकृत्स्नोवेदोधर्मेप्रमाणमित्युक्तं।तत्रप्रथमपादेचोदनालक्षणंविध्यंशं
परित्यज्यविशिष्टोधर्मप्रमितिंजनयतीतिच।तत्रार्थवादानांतदभावमाशंक्यप्रवर्त्तनाशेषत्वमुक्तं।मंत्रा।
णांनिरर्थकत्वेव्रीह्यादिवद्धर्मप्रमित्युपयोगोनास्तीतिअध्ययनाम्नावेवेदत्वमपिसंदिग्धंनवेदितमर्थं
वक्तानिरूपिताब्राह्मणवद्धर्मप्रतीतिंजनयिष्यतीतितेनयंहिधर्मेप्रमाणं।मंत्रब्राह्मणयोर्वेदस्यप्रमा
णमितिवाक्यान्तराप्रवृत्तेः।पूर्वंब्राह्मणंजनयतिप्रवृत्तिसमयेमंत्रइति।नापिस्मारकत्वंस्वतंत्रत्वात्॥
अप्रमाण्यप्रसंगात्स्वप्रमितिरेवकर्मांगंनाप्रमितीः॥वेदपा —करोतीतिश्रुतेः।प्रसंगात्स्मृतयोपि
धर्मेप्रमाणमितिविचारिताः।ततोविधुहेत्वांत —र्गतोद्भिदादिशब्दानांअर्थवादमंत्रापरपार्याये
गुणविधित्वमाशंकितं।अर्थवादवद्भिन्नवाक्यत्वाभावेविध्येकवाक्यत्वाभावात्स्वातंत्र्यात्तन्नावेमंत्रत्वं १
चनोपपद्यतइत्यानर्थक्यपर्यवसानमितिनामधेयत्वमुक्तंसमुदायपरिज्ञानार्थं।नहिसंगाप्रधानेन

मातिरिक्तं किंचित्प्रमाणमस्ति। अतो यागादेः स्वफलसाधकत्वं तज्ज्ञानमप्यंगं। ततः संदेहेप्युपाय।
उक्तः। विधेःशास्यापि धर्मत्वज्ञापकत्वात्। फलस्तुत्योरप्यर्थत्वसंपादकत्वात्। कृत्स्नो वेदो धर्मे प्रमा।
णमिति सिद्धं। अतः परं वाक्यार्थव्याख्यानावसरः। तत्रायं संदेहः। कृत्स्नेनापि वेदेनैको धर्मः प्रतिपा
द्यते उतानेकः। यदाप्यनेकस्तदा पदे पदे धर्मः उत केषुचिदेवेति तदर्थं धर्मभेदाध्याय आरभ्यते॥
तत्र प्रथमे पादे केषुचिदेव धर्मः। इतरा तदर्थमिति निरूप्यते। तत्र विनिगमनाभावात्सर्वेषु पदेषु ध
र्म इत्याशंक्य विनिगमनमाह। भावार्थाः कर्मशब्दाः इति। यो विधीयते सोर्थः। क्रिया च विधीयते। पु
रुषप्रयत्नेन सम्यग्निष्पाद्यत इति। सा क्रिया कर्मवाचकेभ्य एव प्रतीयते। अतः कर्मशब्दा एव साक्षा
द्धर्मवाचकाः। कर्मशब्दानामर्थमाह। भाव एवार्थो येषामिति। इदमेवानुगतं रूपं क्रियासामान्यं।
धर्मपदप्रवृत्तिनिमित्तं क्रियासामान्यं प्रतिपादयंतो विशेषप्रतिपादकाः इत्युक्तं भवति। ननु किं स्व
पदस्य निरूपणेन क्रियावाचिभ्य एव धर्मः प्रतीयत इत्युच्यतां। सत्यं क्रियामात्रं यदि स धर्मो न वेत्त

दानवक्तव्यं।किंत्वतींद्रियोयागादिष्ठिरोधर्मः।तत्रसामान्यंनित्यमितिनित्यताप्रतिपादिताविशेषः स्व

तींद्रियता।इष्टदेवतासंबंधोहियागः।देवतायाश्चातींद्रियत्वात्तत्संबंधोप्य—तींद्रियः।संबंधश्चप्रीति

हेतुत्वेनस्वीकारः।इष्टंचालौकिकमिष्टानित्यतायोनकोपिहेतुः।नहिचेलापागोयेनविनाशःकल्प्येत।अ

दृष्टंवा।येक्षणिकत्वमदृष्टंवाकल्पयंतिनतेयागपदार्थविदः।भावार्थायेकर्मशब्दाइत्यर्थः।दानमपिपर

स्वत्वापादनमतींद्रियं।लोकास्तुतद्विषयककायिकव्यारेतत्प्रयोगमाहुः।नन्ववघातादयऐंद्रियकाश्च

श्रुतरविनाश्विनश्चेतिचेन्न।मंत्रेणचावघातेदेवपत्न्याश्चकर्मः।लौकिकेचतदावाहनादतींद्रियत्वमे

वफलेसंपन्नेतस्यतिरोभावः।सएवह्यर्थः।लौकिकंतुसंसारहेतुत्वादनर्थः।अतएवविधीयतेपुरुषः

प्रवर्त्तते।अन्यथाप्रयत्नेप्रयत्नाभावादकथंनस्यात्।तस्माद्भावार्थायेकर्मवाचकास्तेभ्यएवधर्मप्रती

तीतिभितरत्तदर्थंसर्वेषांभावोर्थइतिचेत्।याद्दिभावार्थेसएवधर्मःप्रतीयतइत्युच्यते।तदासर्वेशब्दा

भावार्थाः।क्रियावाचकाश्चसर्वेधातुजाः।कृत्प्रत्ययेनचभावोभिधीयतेइतिसर्वपक्षिणोमतमनुवदति २

इति चेदिति। परिहरति सम्बद्धयेन। धर्मप्रमितो भावार्थकर्मत्वात् स्वत्वमेव न प्रयोजकं किं तु पुरुषापेक्षापि
पुरुषार्थत्वात्। अन्तस्सापेक्षानपेक्षविभागमाह। येषामुत्पन्नो स्वप्रयोगरूपो लब्धिता नि नाम्नानित
स्मात्ते ऽन्यपराकांक्षानन्तत्वात् स्वप्रयोगे। स्वन्नाष्टोऽर्थवाची। षष्ठ्यर्थे सप्तमी। येषां नाष्टानामर्थस्योत्प
त्यनन्तरं प्रयोगकाले स्वरूपमुपलभ्यते तत्पन्नो व्यवहारकाले तिष्ठति तेषां नाष्टानां नाम इति संज्ञा। नामा
ख्याते चोपसर्गनिपाताः इति वचनात्। नमंति नामयंति स्वार्थे आख्यातार्थमिति नामसंज्ञा परार्थत्व
ज्ञापिका। अत एव स्वातंत्र्याभावान्न तेभ्यो — — धर्मः प्रतीयत इत्यर्थः। अकृतोपयोगमाह। तस्मात्। स्वा
र्थत्वात्तेभ्यो नामपदेभ्यः पराकांक्षा न विद्यते तद्भवणानंतरं पुरुषाकांक्षा न भवति। यथा पचति लु
नेक इत्याकांक्षा न तथा घट इत्युक्ते नापि पाक इत्युक्ते निष्पादनार्थे हि पुरुषापेक्ष ते तेषामर्थस्तु स्व
योगकाले सिद्धः लक्षणार्थे एवं निरूपितमिति। पुनः प्रयोजनकाले कथितं। तस्मात् पुरुषापेक्षाना
वात् पुरुषार्थो धर्मो न तेभ्यः प्रतीयत इति। येषां तूत्पन्नावर्थे स्वप्रयोगो न विद्यते तान्याख्यातानि त

स्यात्तेभ्यः प्रतीयेताश्रितत्वात्प्रयोगस्य । सर्ववदत्रापीति पक्षं वारयति तुशब्दः । येषां शास्त्राणामर्थोऽस्य
स्यनंतरं श्रेयः प्रयोगो न विद्यते । श्रेयःप्रदर्शप्रयोगो न विद्यते । यथा श्येनघट इति तत्सु लिप्सम येप्रयो
गो नात्र निषिध्यते तेषामाख्यात इति ये धर्मशब्दाख्यायत इति ज्ञापनार्थः । तस्माद्विद्यमानार्थत्वाद(
निष्पन्नार्थपुरुषाकांक्षाया विद्यमानत्वात्तेभ्यः पदेभ्यो धर्मः प्रतीयेत किं वा श्राश्रितत्वात्प्रयोग
स्य । प्रयोगो हि पुरुषाश्रितो भवति । पुरुषप्रयत्नव्यतिरेकेण धर्मो न निष्पद्यते । आख्यातार्थश्च भाव(
ना पुरुषधर्मः अतः स्वनिष्पत्त्यर्थं पुनः पुनः प्रयोगार्थं च पुरुषापेक्षित इति पुरुषार्थो धर्मस्तेभ्यः
प्रतीयत इत्यर्थः । पुरुषेणाप्यर्थ्यते सकलः पुरुषोऽप्यर्थ्यत इति पुरुषार्थो धर्मस्तस्मादाख्यातेभ्य
एव धर्मः । लिङर्थविशेषमाह । चोदनालक्षणोऽर्थो धर्मः ॥ चोदना प्रवर्तकं वाक्यं तद्धर्मलक्षणत्वेनोक्तं ॥ २
तस्याः धर्मत्वपरिकल्पमतो विशेष्यत्वेन धर्मो न प्रतिपाद्यत इति विशेषणत्वेनैव धर्मप्रमितिः ॥
तत्र विशेषणत्वमौदासीन्यप्रभृतारंभो निषेधादन्तर्थः प्रवृत्तिरित्येतावान्विशेषः । धर्मप्रमिति

स्तुमवक्ष्येवेतिनाश्राप्तिः।चोदनात्वा——रंनहेतुत्वादारंभ॥लिङर्थस्तुशाब्दव्यापारोऽभिधात्म-
करणः सर्वोपरीभावापन्नः।तस्यपुरुषप्रेरणासंबंधः।प्रतीत्यनुरोधेनतथाकल्प्यते।त्रेधाहिपु-
रुषः प्रवर्त्ततेपुरुषश्चत्रेधाभवतिकामभयोवैदिकोऽनुभवासहिमुक्श्चेति।तत्रस्वर्गकामयदादयः
।विधेर्द्वितीयः।स्वार्थवादैस्तृतीयः।प्रवर्त्तते।वैदिकत्वब्रह्मानंदःफलं।ईश्वरःप्रवर्त्तयतीतिमतं।इष्टवि-
रोधिःएवमाख्यातपदेऽस्मोधर्मः।अन्यानीतदुपकारकाणितुकं।तानिसर्वाण्येवफलंसाधयंतुतत्का-
निचिदेवेत्याशंक्यप्रधानाप्रधानभेदेनविभजतिप्रधानदेवफलमितिज्ञापयितुं।तानिद्वैधंगुणः-
प्रधानभूतानि।तान्याख्यातवाक्यानिद्विविधानिगुणभूतान्यप्रधानभूतानिप्रधानभूतानिच।तत्र
प्रधानानिनिरूपयति।येद्रव्यंनचिकीर्षतेतानिप्रधानभूतानिद्रव्यस्यगुणभूतत्वात्।प्रधानंफलंतत्
साधकंचप्रधानंद्रव्यमप्रधानंतत्साधकंचाप्रधानं।पुरुषस्यनिस्पृधीक्ताविषयःएवप्रधानंयेद्रव्यं
नचिकीर्षतेसंस्कर्तुंपुरुषेणनजन्यते।किंतुसंस्कृतस्यद्रव्यस्यदेवतासंबंधोबोध्यतेतानिप्रधानभू-

तानि।ननुद्रव्यदेवतासंबंधोयागः।तत्रद्रव्यमेवप्रधानंसंबंधस्यधर्मित्वेनगुणत्वात्।संप्रदानस्या-
पिद्रव्यमन्नीहंस्विप्रायगांददातीत्यत्रगोःप्राधान्यादित्याशंक्याह।द्रव्यस्यगुणभूतत्वात्।द्रव्यंयद्यपिमु-
ख्यंव्यवह्रियतइतिगुणभूतमेव।गामित्यत्रततःपरंयथेष्टविनियोगाभावात्।कर्मतानेतावताद्रव्य
स्यप्राधान्यंगुणभूतानिलक्षयति।येस्तुद्रव्यंचिकीर्ष्यतेगुणस्तत्रप्रतीयेततस्यद्रव्यस्यप्रधानत्वा
त्।तुशब्दःप्राधान्यंवारयति।द्रव्यंचिकीर्ष्यतेसंस्क्रियतेद्रव्यमुद्दिश्ययैःसंस्कारोविधीयतेतेषुवाक्येषु
गुणःगुणभूतानिकर्माणिप्रतीयेतइत्यर्थः।तत्रहेतुः।तस्यद्रव्यप्रधानत्वात्।तेषांकर्मणांद्रव्यमेव
प्रधानंसंस्कार्यत्वात्स्वयमप्रधानंसंस्कारत्वात्।एकवचनंप्राधान्यबोधनाय।अस्यविचारस्यप्र-
योजनमतिदेशोभवति।यद्यवघातोपिनुष्ठ्यःविकृतौनातिदिश्येत।प्रधानकर्मणामतिदेशात्।
अप्राधान्येतुप्रयोगवचनादप्यवघातः।अयंचांगविचाराद्भिन्नः।अन्यथाप्रयाजादीनांप्रधानत्वेना-
तिदेशोनस्यात्।तथाचद्रव्यसंस्कारासंस्कारत्वेनैवविभागः।२।धर्ममात्रेतुकर्मस्यादनिर्वृत्तेःप्रयाज

वृताःस्रुवंसंमार्ष्टिपरिधीन्संमार्ष्टिपुरोडाशंपर्यग्निकरोतीत्यादिश्रूयते।तत्रद्रव्येविकारोनजायतइ
तिसंस्कारकर्मत्वमेषामुतनेति।अस्मिन्विचारेपूर्वपक्षमाह।धर्ममात्रेतुफलकर्मैवनवक्तु।तुशब्दः
पूर्वपक्षार्थनिषेधकः।यत्रधर्ममात्रंक्रियतेनतुद्रव्यंविक्रियते।नचसंमार्जनेनस्रुवोन्यथाभवति।
तस्मात्संमार्जनादिकंफलकर्मयथाप्रयाजानद्रव्यंसंस्कुर्वंति।तत्रहेतुः।अनिष्पत्तेः।नहिसंमार्जना
दिभिःपूर्वरूपंतस्यनिवर्तते।तुल्यश्रुतित्वाद्वेतरैःसधर्मःस्यात्।वेतिपक्षंव्यावर्तयति।संमार्गोप्यव
घाततुल्यःसधर्मःसमानधर्मःद्रव्यसंस्कारकःस्यात्।तत्रहेतुः।तुल्यश्रुतित्वात्।द्वितीयांतपदेनोत्र
यत्रापिद्रव्यमुद्दिश्यते।व्रीहीनवहंतिस्रुवंसंमार्ष्टीति।अतइतरैरवघातादिभिःसधर्मःद्रव्यमुद्दि
श्यसंस्कारत्वेनमार्जनंविधीयतइति।द्रव्योपदेशइतिचेत्।नतुनात्रद्रव्यमुद्दिश्यमार्जनंविधीयते
किंतुमार्जनमुद्दिश्यद्रव्यमेवस्रुवादिकंविधीयते।द्वितीयाश्रुतिस्तुयत्रैवप्राधान्याविवक्षातत्रैवभ
वति।द्रव्येदेवतायांकर्मणिच।अंजलिनासक्तून्प्रदाव्येजुहुयात्।दशान्नानिजुहोति।सोमंय

जति। त्वष्टारं यजति। अग्निहोत्रं जुहोति। प्रयाजान् यजति। तस्मात् द्वितीयाश्रुते। नियामकत्वात्। स्रु
वादिद्रव्यमेव विधीयत इति चेत्। न तदर्थत्वात्। लोकवत्तस्य च शेषवत्तत्वात्। परिहरति नेति। द्रव्यं मा
त्र विधातुं शक्यते। तत्र हेतुः तदर्थत्वात्। द्रव्यार्थत्वात्संमार्जनस्य। यो हि यदर्थः सप्रवत उद्देशेन विधी
यते। ननु किमत्र नियामकं द्रव्यं मार्जनार्थं न भवति। किंतु मार्जनमेव द्रव्यार्थमित्याशंक्याह। लोकव
त्। लोके हि गृहार्थं मार्जनं न तु मार्जनार्थं गृहनिर्माणमिति। ननु लोके स्पष्टेनार्थे गौरानीयते स्रुत
उत्पन्नमप्यस्तीति किं नियामकमिति चेत्तत्राह। तस्य च शेषवत्तत्वात्। तस्य स्रुवादेर्दर्शपूर्णमासशेष
वत्तत्वात्। संस्कृतं हि द्रव्यमुत्तरत्रोपयुज्यते। अतः प्रकरणमेव नियामकं। परिधीन् संमार्ष्टि पुनात्ये
वैनान् पवित्रं हि द्रव्यमग्रे उपयुज्यत इति। अग्रमपि संमार्जनं तस्य दूरीकरणार्थं रक्षसामपहत्यै च
पर्याग्निकरणं च सर्वं कृतार्थमस्कंदाय। अतो द्रव्याणां शेषवत्तत्वात्संस्कारस्तदर्थः। स्तुतशस्त्रयोः सं
स्कारो याज्यादेवतानिधानात्। द्रव्यसंस्कारो विचारितो देवतासंस्कारो विचार्यते। आज्यैः स्तुवते पृष्ठैः ५

स्तुवते प्रउगं शंसंति निष्केवल्यं शंसंतीत्यादि तत्र संदेहः। किं स्तोत्रशास्त्रे संस्कारार्थे उत प्रधानकर्मणी
फलार्थे। तत्र पूर्वपक्षः। स्तुतशस्त्रयोः संस्कारः प्रतीयते। ग्रहदेवते एताभ्यां संस्क्रियते। यथा संस्कृत
वि प्रदानेनाग्निप्रेति। तथा स्तुतं ग्रहदानेनाग्निप्रेति। ननु तत्रातिशयाधानं वा मलापकर्षणं वा नास्ति
त इति कथं संस्कारस्तत्राह। याज्यावत्। याज्यायां द्रव्यसंबंधित्वेन देवता निरूप्यते प्रकृत हविर्ग्रह
णाय। सा हि स्वधर्मस्याश्रिता हविर्ग्रहणाति। अन्यथानुष्ठानमग्रहणीयात्। तथा स्तुतशस्त्राभ्यां च प्रोक्ता।
ह युक्ता गृहीत्या तत्प्रोक्ता ह एव संस्कारः। ननु गुणा एवात्रोच्यंते न देवता तस्य तत्राह। देवताभिधानत्वा
त् गुणकथनेन देवतैव प्रमुख्यतया अभिधीयते गुणानां परार्थत्वात्। अतो देवतासंस्कारः स्तुतशस्त्र
योः। अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात्। तु शब्दः पक्षं व्यावर्तयति। देवता।
संस्कारपक्षे यत्र देवता तत्र इंद्रस्य नु वीर्याणीति पंचदशं चातथेंद्रस्यैव निविदः। इंद्रो यात इति प्र
नियमः। तथापि निर्बंधे यत्र प्रधानायाः अत्र महेंद्रस्य नामापि न श्रूयते। तथा मंत्रापि ग्रहदेवते।

वस्तूयत इति न नियमः। तथापि निर्वपेयत्रैंद्र एव ग्रहः मरुत्वतीये उच्येवा तत्रैव स्तुतिशास्त्रेऽप
कृष्येयातां। ननु प्रधानपक्षेपि मंत्रलिंगात्कथं नापकृष्यत इति चेत्तत्राह। अचोदनार्थे सगुणत्वे तत्वा
त्। चोदनार्थः प्रधानं तल्लिंगात्नापकृष्यते। यथा ऐंद्रिया गार्हपत्यमुपतिष्ठत इति चोदनार्थस्तत्वाद्यां
तः द्वितीयांतस्तदतिरिक्तः निष्केवल्यं शंसतीति सगुणत्वे तत्र न पकृष्येत। अतो न संस्कारस्तास्यां
वशावद्वा गुणार्थत्वात्। पुनः शंकते। इंद्र एव महेंद्र इति महत्वं गुणः। यथा महाराजो महाब्राह्मण
इति। तर्हि गुणविशिष्टं परित्यज्य केवलः कथं स्तूयते तत्राह। वशावत्। सा वा एषा सर्वदेवत्या यदजा व
शा वायव्यामालभेतेति यागे छागाया वपाया मेदसोऽनुष्यतां हविरिति निगादो भवति। तथापि स
गुणोपि केवलः स्तूयते तत्र हेतुः गुणार्थत्वात्। गुणकथनार्थं देवता गृह्यते तत्र सगुणस्य ग्रहणं
त्वर्थं न हि जलानयनार्थी गृहात्म जलं नानयति। गुणार्थं स्यादिति पाठस्तत्र शास्त्रसंस्कारार्थे भे
वस्यादिति हि सर्वं पक्षार्थानुवादः। तस्मादिंद्रमहेंद्रयोरभेदात् संस्कारपक्षेपि न दोषः॥ न श्रुति समवा

16 यित्वात्। परिहरति नेति। न महेंद्र इंद्रो न वितुमर्हति। तत्र हेतुः। श्रुतिसमवायित्वात्। श्रुतो महे
न्द्रपदे तद्धितांते महत्त्वलक्षणो गुणः स एवेतः तेन वा इंद्रः स केवलः एषु कर्तुं न शक्यते। सन्नियो
गशिष्टानामिति न्यायात्। न हीन्द्रशब्दात्तद्धितः तस्मात् असति महेंद्रे इति स्यात्। असमर्थत्वात्समास
श्च न भवेत्। अतः शब्दभेदादिंद्रान्महेंद्रो भिन्नः। व्यपदेशाच्च। 17 भेदेन व्यपदेशश्च न भवति। इंद्रं निग
मेषु पलरूपये दिंद्रयाजिनो महेंद्रयाजिन इति। ततो अधिकामयजेतेति चा आग्नेयं च विकल्पो नोप
पद्यत इति भेदः। गुणश्चानर्थकः स्यात्। 18 हेत्वंतरमाह। यदि गुणो भेदको न स्यात् अनर्थक एव स्या
त्। न हि तस्यान्यत् प्रयोजनमस्ति। तस्मादपि भिन्नः। तथा याज्यापुरो 19 नुवाक्ययोः अनर्थकः स्यादित्यनु
वर्त्तते। इंद्रमहेंद्रयोर्याज्यापुरोनुवाक्ये भिन्ने तया निरूप्यते। ते व्यर्थे भवतः। ऐंद्रमाडसिंघसमाहि
षेऽहं ते इंद्रस्य महाँ इंद्रो य ओजसा महाँ इंद्रो नृवदा चर्षणिप्रा इति अनुमंत्रणे भेदश्च ज्ञातव्यः। त
स्मादपि भिन्नः। वशायामर्थसमवाया 20 त्। ननु तं वशाङ्कविष्यतीति। तत्रोत्तरमुच्यते। अजावशा छाग वा।

ष्टेनोच्यते। निगदे जातिवाची शब्दः। द्वयोरुक्त्यः। तत्र छागत्वजातिर्वस्त्रायां समवेतत्वात्तत्संबन्धेन द्रव्य
त इति निगदे युक्तः। तथैवेहमहे ष्टोन प्रत्यक्षसिद्धो नापीदृत्वं जातिः। तस्मात्तत्र जातिरूपस्यार्थस्यास
मवायाद्विषमो दृष्टान्त इत्यर्थः। यत्रेति वार्थवत्त्वात्स्यात्। वाशब्दः पक्षं व्यावर्तयति। संस्कारकर्म
णि एवस्रुतशास्त्रे अर्थवत्त्वादपकर्षो नास्माकं बाधकः। यत्र लिङ्गेन विनियोगः स्यात्तत्सत्यावा
साधारण्येन यत्र नायमानानामर्थवत्ता तत्र नयनं स्यात्। न तावता संस्कारपक्षस्य ज्यते। अपक
ष्यतामिति प्ररोचनामात्रं। इति शङ्क्षेमन सिद्धितं वाक्यार्थपरामर्शाति। यत्रापकृष्यमाणानामर्थ
वत्ता न वति। तत्रेति अर्थवत्त्वाद्धेतोरपकर्षः स्यादित्यर्थः। न चाम्नातेषु। यत्र पुनः स्तोत्रशस्त्राण्य
र्थमविचार्यैवाम्नायन्ते। यथा याम्याः शंसन्ति मर्यादा त्रियाकृत्रिः स्तुवन्तीति मनोत्रहे शिपिविष्ट
वतीः स्तुवन्तीति प्रायश्चित्ते तथा मृषिकास्तक्तादीन्यपि तत्र विनियुज्यन्ते। तस्मादर्थमविचार्यैव य
त्र विनियोगस्तत्रापकर्षो नावात्संस्कारत्वेसिद्धेत् आम्नायादन्यत्रापि न विष्यतीत्यर्थः। न चैवं

कथं।तेषामर्थएवनास्तिविद्यमानोवायत्नेनोपयुज्यतेनान्येवार्थमविचार्यविधीयते।इतिवा
च्यं।अर्थवत्तामेवविधानादित्याह।दृ23श्यते।सर्वेषामर्थवत्तास्तिमेषकाल्हमंडूकादयस्तत्तस्मके
वाच्याः।तत्राग्नौमंडूकोपयोगः।राजसूयेकारणंउपशायेमेषकस्यातत्तस्मकानांतत्तद्यागेउप
योगस्पष्टः।सर्वेषांचवाचःस्तोमेविनियोगउच्यते।सर्वाऋचःसर्वाणियजूंषिसर्वाणिनामानि
वाचःस्तोमेपारिप्लवंशंसतीति।तथायस्याग्निमुद्धास्यमानेसूर्योनाविःस्यादपिसर्वादाशतयी
रनुब्रूयादिति।तस्मादुत्कर्षेप्यन्यत्रार्थवत्तावर्त्तत इति।उत्कर्षेनयात्प्रधानकर्मणीवक्तव्ये।अ
तःसर्वत्रोत्कर्षान्नावात्कोचिदुत्कर्षेनदोषः।अपिवाश्रुतिसंयोगात्प्रकरणेस्तौतिशंसती25तिक्रि
योत्पत्तिंविदध्या24तां।अपिवाप्रधानकर्मणिस्तोत्रशस्त्रेस्यातां।तत्रहेतुःश्रुतिसंयोगात्श्रुतिषु
वेदनागेषुसंयोगोवर्त्ततेकवतीषुस्तुवते।अपिविष्टवतीषुस्तुवतेइति।नहिकश्चादृष्टः।अपिविष्टे
राष्ट्रेवास्तुतावुपयुज्यते।अतःस्वप्रकरणेस्तौतिशंसतीतिवाक्येप्रधानक्रियोत्पत्तिमेवविद

ध्यातं। संस्कारकर्मत्वेनानयोः प्रकरणित्वं। प्रधानत्वेनाहरणमेव कर्मफलायेति सर्वेषु स्थ्रेहे त्वंतरमा
ह। ग्रहैकत्वकाश्च ग्रहैर्नेवस्तोत्राणामेकत्वं नेदो नमन्यते। द्वादशाग्निहोमेषि जदशो कृन्मे इत्यादि।
स्तुतिस्त्वकाक्षनं तावातु नयथा द्वादशादिसंख्याग्रहन्मे तत्कृप्ये एवमवनत्रयेष्यावर्त्तत इति दे
वता कुतोपि न संख्यानियमः। अतः संख्या — — सार्थकत्वाय प्रधानकर्मणेण वेत्यंगीकर्त्तव्यं। अ
नर्थकं चैतद्वचनं। अग्निस्तुतिश्रूयते। आग्नेयाग्रहा भवंतीति। तत्र पुनरुच्यते आग्नेयीषु स्तुवते।
आग्नेयीषु शंसतीति। इदं वचनमनर्थकं स्यात्। प्रकृतिन्यायेन सर्वेषामाविनरनिषेधार्थमिदं वचनं
देवतान्तरेषु त्वेवि तरन्न प्राप्नोति। अग्निस्तुत्यदैनेव देवतांतरनिषेधात्। तथैंद्रस्तुतिः तस्मात्तस्मार्थ
कत्वाय प्रधानकर्मणैव। अन्यमार्थः प्रतीयते। यदि स्तुतिर्देवं प्रतीयते तदा स्तोत्रशास्त्रयोर्भेदो
न स्यात्। अन्यद्धि स्तोत्रमन्यच्च शास्त्रमिति शाक्रभेदात्स्वरूपभेदाच्चावगम्यते। तस्मात्स्तोत्राणां मन्त्र
ता। अर्थश्चान्यत्तनयोः। बहिः पवमानस्य पवित्रार्थत्वे तं दायमस्युत ग्रहोपयोगः। कालविप्रकर्षश्च।

तस्मादपिप्रधानकर्म ॥ २८ ॥ अभिधानं च कर्मवत् । प्रधानकर्मवदेवाभिधानं भवति । यथाग्रहं गृह्णा
ति तथैवब्रतग्रंसमिंके वल्पं शंसति द्वितीयाश्रुतिरत्र प्रधानत्वमाह । तस्मादपि प्रधानकर्म । फ
२९ लनिर्वृत्तिश्च ॥ फलेन निर्वृत्तिः समाप्तिश्चोच्यते । इदं प्रधानस्यैव भवति । स्तुतस्य स्तुतमसि शस्त्रस्य शस्त्र
मसीत्यनुमंत्रणमंत्रावुच्येते । तत्रार्थवादो यज्ञो वाव यज्ञपतिं दुहइत्यारत्यसोमयागस्य साधक
त्वात् स्तुतशस्त्रयोर्दोहत्वेनेमौ मंत्रौ निरूपितौ । अतः प्रधानोपकारकत्वात् प्रधानकर्मण्येव विनि
सिद्धा ॥ विधिमंत्रयोरैकार्थ्यमेकशब्द्यात् ॥ ३० ॥ इदं समाम्नायते । मत्ता नद्धपतिं न दधाति तस्करो नैनामभ्र
मित्रो व्यथिरादधर्षति देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सहेति । यस्तु गाः द
दाति । अनुबंध्यादिषु च यजते तस्य गाः व्यर्थं न नश्यन्ति तस्करोपि स्वार्थेन स्थापयति न गृह्णाति । त्यर्थः
मृत्युरूपापि व्यथाता सां धर्षणं न करोति किंतु स गोपतिस्ताभिः सह वर्तते संचितः पुण्येन भवति ज्योति
ष्मान्भूयेश्व सहि कारणात् सर्वेषां मोद ददाति । मधुधारारूपांश्च देवान् पाययति श्रूयते यजते । अतः स

९ वेदाख्यहस्तेनः प्रकाशते। अत्र यजते ददातीत्युदाहरणं। अत्र संदेहः। यथा दादश्वानातं ददाति अनुवंधा
मालभेतेति विधायकं। तथात्राप्यपि यजते ददाति। अनुवंध्यामालभेतेति विधायके ऽति विधायकेऽत्र
तनेति किं तावत्स्यात् विधायके इति। तदाह विधिमंत्रयोरैकार्थ्ये प्रवर्तकत्वं। तत्र हेतुरैकपद्यात्। एक
एवत्राद्वयत्र यत्र। न हि समवेकत्र प्रवर्तको परत्र नेति वक्तुं शक्यते। तस्माद्वयत्र विधायको। अपि वा
३१
प्रयोगसामर्थ्यान्मंत्रोभिधानवाची स्यात्। अपि वेति पक्षं व्यावर्तयति। मंत्रोभिधानवाची केवलं धर्मप्र
मितिमेव जनयति न विधायकः। तत्र हेतुः प्रयोगसामर्थ्यात्। मंत्रस्तु प्रयोगे समर्थः। प्रयोगः प्रवृत्त
स्य व्यापारनिचयः। विधिस्तु प्रवर्तकः पूर्वसिद्धः तेनैव प्रवृत्तत्वात्। कृतिसमये प्रवृत्तकत्वं व्यर्थं। किं
३२
तु प्रमितिमेव जनयति विद्यया कुर्यादिति। तस्मान्मंत्रो न विधायकः। तच्चोदकेषु मंत्राख्या। ननु मंत्रब्रा ९
ह्मणयोर्विभाग एव न ज्ञायते वेदत्वस्य तुल्यत्वात्। अतः सर्वाधिकरणविचारो न युक्त इत्याशंक्य मंत्रस्य ल
क्षणमाह। तच्चोदकाः मंत्रा यस्यां ख्यापनरूपे धिष्ण्ये सत एव विधिर्व प्रेरको यस्य यद्यप्यध्ययनविधिः

नासर्वमेवप्रेरितं तथाप्रायश्चित्तादौ तथापि कर्मविधिना नुष्ठानं बोध्यते विविधं। मंत्रस्तु साधनत्वेन
बोध्यते इत्यथापि कर्मणि तदनुवादकत्वात्। तत्त्वोदकमेव। अतः कर्मणि यागजपादौ यः साधनत्वतः
शब्दः स मंत्रः। कर्मकरणः शब्दो मंत्र इत्युक्तं भवति। शेषे ब्राह्मणशब्दः। 33 मंत्रलक्षणं निरूप्य ब्राह्मणल
क्षणमाह। मंत्रातिरिक्तो वेदो ब्राह्मणमिति। अनेन वेदे भागद्वयमित्युक्तं। अर्थवादानामपि ब्राह्म
णत्वमेव। अनाम्नातेष्वमंत्रत्वमाम्नातेषु हि विभागः 34 प्रवरोहनामधेयानां मंत्रत्वमस्तु न वेति विचा
रः। किं तावत्प्राप्तं तच्चोदकसद्भावान्मंत्रत्वमिति प्राप्ते निधीयते। अनाम्नाता एते अमंत्राः। आम्ना
तत्वे सति तच्चोदकेषु मंत्राख्या। तथात्वे सत्येव शेषे ब्राह्मणशब्दस्तदाहाम्नातेषु विभागो द्विविधं।
अन्यथा लौकिकवाक्यानामं कल्पस्य च तथात्वं स्यात्। तस्मात्प्रवरादीनां न मंत्रत्वं। तथा न ब्राह्मण
त्वं। केचनार्यप्रसिद्ध्या मंत्रत्वमाहुः। तत्प्रकरणे नेदे नस्थितयोः ऊहप्रश्नयोरेव संभवति न तु ऊहशारू
पयजुः शाखांतरेपि। वाजसनेयिके ब्राह्मणे ब्राह्मणं। वसंताय कपिंजलानालभेतेति न मंत्रो अमंत्र

योऽपि तत्र वृक्षरूपस्थाणुगणपाशाग्रयजुष्ट्वार्थे। मंत्रब्राह्मणयोर्वेदस्त्रिगुणत्वं प्रयात इति तस्मात्तत्रैक
मेव लक्षणमुक्तं। तेषामृग्यत्रार्थवशेन पादव्यवस्था (३५) ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामिति मंत्रे मं(सता
त्राणां त्रैविध्यमुक्तं तत्र लक्षणाभावे भेदकाभावात्त्रैविध्यं तोपपद्यते इति क्रमेण लक्षयति। तेषां त्रिविधा
नां मंत्राणां मध्ये ऋग्रूपा यत्रार्थवशेन पादव्यवस्था। अर्थवाचकपदानुरोधेनादिपादादिव्यवस्था ननु(
छंदोनुरोधेन मगणादिकृता पादव्यवस्था। अनुवाद एवायं लौकिकानां वेदत्वाभावाद्भावान्मेदप्रसं(
गात्। तस्मादर्थनिरूपकपदानुरोधेन पादव्यवस्था सा ऋक्। गीतिषु सामाख्या (३६) ऋगित्यनुवर्त्तते
ऋक्षु यद्गानं तत्साम सा ऋक् तस्यां साम वर्णविकारेणान निष्क्रमः स्वरः स लोके गीतिपदाभिधेयो भव
तीति गी। गीतिषु सामाख्येत्युक्तं। नन्वस्य वेदत्वे को हेतुः धर्मप्रतिपादनमिति ब्रूमः। ननु संकेताभावात्क १०
थं प्रतिपादकत्वं। आधारऋचैव सोऽर्थः प्रतिपाद्यत इति प्रयोजनाभावश्च। उ। ऋक्षु यः साम नागः(
समायाति सोऽन निष्क्रमस्य ज्ञापनार्थः। कथमस्य स्वलक्षणतो रस इति भवति जिज्ञासा। अनेन मज

पुरुषयज्ञोपिज्ञातोभवतियस्यांज्ञायज्ञाः।अतएवसामानियोवेदसवेदसर्वमिति।अपोनरूक्तं
तुतत्तदाश्रयऋगर्थमन्त्रबोधकत्वेनतस्मात्सूक्तंऋगीतिषुसामाख्येति।37 शेषेयजुःशब्दः।ऋक्सामा
तिरिक्तोमंत्रोयजुः।ननुप्रकटार्थः।पादरहितोमंत्रोयजुरितिकुतोनोक्तं।अनुष्टत्तल्लघुत्वात्।मत्वामं
त्रमात्रेपियजुःप्रयोगोस्तिएतद्वैयजुस्त्रयीविद्यांप्रतीति।तथाश्रुतिछंदसर्वाणिमिमीतेपंचदशत्वोयजु
षामिमीतइति।अतोविशेषविवक्षाभावेपियथायजुःप्रयोगोभवति।तदर्थंशेषेयजुःशब्दइति।मं
त्राणांभेदत्रयमेवेतिचव्यपदिशति।तेनाक्षरविधानेपियजुषेतिप्रयोगोभवति।पंचभिराहवनीयमि
ति।तस्माद्युक्तं।शेषेयजुःशब्दइति।निगदोवाचतुर्थंस्याद्धर्मविशेषात्।38 त्रिविधाएवमंत्राइत्युक्तं।
निगदानांत्रिष्वंतर्भावाच्चतुर्थोपिभेदोस्त्वित्याह।निगदोवाचतुर्थंस्यात्।वाशब्दःपूर्वनियमनिराक
रणार्थः।चतुर्थंरूपमिति।तत्रहेतुर्धर्मविशेषात्।उच्चैःऋक्साम्नांक्रियतउपांशुयजुर्वेदेनोच्चैर्नि
गदेनेति।पादव्यवस्थाभावात्तुउपांशुधर्मस्यातिरिक्तोनिगदधर्मइतिधर्मभेदकोभवति।निविदांत्वना।

॥ स्यात्त्वान्न शंका। तस्माच्चतुर्थो निगदः। 39 व्यपदेशाच्च। निगद इति भिन्नो व्यपदेशः। नापि यजुःपर्यायः।
यजुर्मात्रे निगदपदप्रयोगाभावात्। विशेषवाचकत्वे प्रमाणाभावः। शेषत्वमप्रयोजकमित्यभिप्रा
यः। तस्मादपि निगदो भिन्नः। 40 यजूंषि वा तद्रूपत्वात्। निगदो यजूंष्येव। तत्र हेतुः। तद्रूपत्वात्। शेषरू
पत्वात्। न ह्यतिरिक्तत्वं धर्मो भिन्न इति तस्माद्यजूंष्येव। 41 वचनाद्धर्मविशेषः। ननु कः प्रसिद्धयजुर्भ्यो भेद
को धर्मविशेष इति। स प्रकारांतरेणोपपद्यत इत्याह। वचनात्। केषांचिद्यजुषां निगदशब्दवा
च्यानामुच्चैष्ट्वमिति। तदतिरिक्तानामुपांशुत्वं। एतावतापि धर्मसिद्धेनैकरूपतागौरवं। तस्मा
द्धर्मविशेषान्न चतुर्थत्वं। 42 अर्थाच्च। वचनादप्युच्चैष्ट्वमर्थादप्युच्चैष्ट्वं न प्राकृतवत्प्रत्याश्रुतादिकमुपां
शुत्वे सार्थकं भवति परप्रतीतिजनकत्वात्। आर्थिकमेतत्। उपसंस्तुतदनावात्। तस्माद्वचनमे ॥
वेति ग्रामकं। स्वनाविको वाच्यं धर्मः। कर्म तु प्रधानमतस्तदनुरोधेन ऋचामप्युपांशुत्वमिति सूच
कमर्थाच्चेति। 43 गुणार्थो व्यपदेशः। निगदस्यातिरिक्तो व्यपदेशो गुणार्थः। नितरां गद्यत इत्युच्चैष्ट्वग

णार्थः। न तु त्रिन्निगुणकथनमर्थं। अतो द्वयं नेदकमस्तु वै यदर्थेनापर्यवसानात्। प्राप्तोऽर्थतो विधा(
नाद्धि गुणस्तत्र स्यो नित्य इति यदि तदा सर्वं वैलक्षण्यात् गुणो नेदक एवास्त्विति चेन्न। मैवं। कर्मलांत्रयां
शुत्वे तदभावात्। अतो गुणकथनाऽपर्यवसानं त्रयाणां। यत्रापि ऋक्सामयोः रूपं श्रुत्वं तत्रापि नि(
गदत्वेद्वैरिति। तस्मात् गुणार्थ एव व्यपदेशादिः। 44 सर्वेषामिति चेत्। निगदस्याऽर्षायोगे नो अच्छे हू गुणव(
वाचको न भवति। तदा ऋक्साम यो रूपि वाचको न भवति। मा हा। सर्वेषां ऋक्साम निगदानां निगदत्वापत्व(
आत्वमिति चेन्मन्यसे इति पूर्वः पक्षः। 45 न व्यपदेशात्। ना ऋग्यत्र ऋक्साम इति भिन्न एव व्यपदेशोऽस्ति(
तेन बलवता ऽर्वेजो बाधनतः स्यर्थः। अपादबद्धस्य निगदः। अतो न पर्यायत्वं अयमेव च नेदकः।
यजुषां तु तदभावात्। गुणस्तव स्यथा सिद्ध इति यजुर्विशेष एव निगदः। अर्थैकत्वादेकं वाक्यं साकांक्षं
46 चेद्विभागे स्यात्। संक्रिप्यपाठ। यजुषि संदेहः। एको मंत्रः कियानिति। यद्यपि विनियोगवाक्यलेनोऽत्र(
तादिनाऽवसानमिति। ज्ञाप्यते। तथापि सर्वेत्र मनुषंगयुक्तेषु वाक्येषु निर्णयानावश्यत्रेणयाव

क्त इति तमाह। अर्थैकत्वादेकं वाक्यमिति। एकार्थप्रतिपादकमेकं वाक्यं। अर्थश्च निराकांक्षः स
च पदैरुच्यित एव। अन्यथा अपर्यवसानमेव स्यात्। उत्थापिताकांक्षायाः सर्वत्र वक्तुं शक्यत्वात्॥
तत्र केचन अनुषंगाः क्रियारहिताः साकांक्षा एव। तेषां संश्लिष्टपाठात् आकांक्षाभावेपि क्रियाप
र्यंतमेकत्वं यथा देवस्य त्वेति। पश्चात् क्रियाश्रवं पदैः सर्वैरेव तु स्यादिति। नन्वेदिका सजूऋतुभिरि
त्यादौ वसवो रुद्रा आदित्या इत्यादि विश्वे देवा देवा इति पंच प्रधानन्ता अर्थैस्तपा इति पंच मंत्राः। अ
तः क्रिया वा देवतादिर्वा यत् एव प्राधान्यमवलंबते स एवार्थैक्ये वाच्यः। केचन मंत्रा आदावेवा
नुषंगयुक्ता यथा आददइत्यादि सं हितो विश्वसामित्यादयो। ते अनुषंगयुक्ताः। केचिदुत्तरत्र स
न्नूरित्यादयः। तस्मादेकार्थप्रतिपादकमेकं वाक्यं। ननु यत्रैकार्थता संदिग्धा तत्र का गतिः। यथा १२
इषे त्वेति। क्रियाकांक्षिका। इषेत्वोर्जेत्वेत्याहेति ब्राह्मणं च संदिग्धं। अतः सत्त्रे प्रसेकमपि विनियो
गउक्तः। समुदायेनापि विनियोगः नचोत्तरस्मादिनेति न्यायेनैक एव मंत्रोस्तु तथा सति षेत्वेप्यविरसीत्या।

धावृजैत्वेतस्यागछेदतो नियामकमाह। साकांक्षं चेद्विभागे स्यात्। एकदेशाकथने यत्र साकां
क्षता तत्रैव संहरणमेकं अन्यथा द्वयं त्रित्रं इषेत्वेत्येकं ऊर्जेत्वेत्यपरं। समुदायविनियोगे मंत्रद्व
यस्योपयोगो बोध्यः। तस्माद्यावता एकार्थप्रतिपादनं तदेकं वाक्यं। मंत्रेषु वाक्यभेदः स्यात्।
पृथिवीदीक्षेत्यादिमंत्रेषु संदेहः। अत्र सर्वेषामेक एव विनियोगः केशिनीदीक्षांजपतीति। कि
मयमनुवाकः सर्वोप्येको मंत्र उतानेकः। अनेकत्वेपि किं पृथिवीदीक्षेत्येतावानेकः। अथवा त
या त्वा दीक्षया दीक्षयामीत्यंतः। किं तावत्प्राप्तं पृथिवीदीक्षेत्येतावानेवैको मंत्रः। एकार्थप्र
तिपादकत्वान्निराकांक्षत्वाच्च। दीक्षोपामीत्यंते तु तया त्वेत्यनुषंगो भवेत्। तथा च प्रतिमंत्रमा
वर्त्तेतत् आदावंतेप्यंतयोर्वा अनुषंगवचनात्। तस्मात्प्रतिवाक्यं मंत्र इति प्राप्ते उच्यते। याव
तां समं रूपं भवति स एको मंत्रः। चत्वारः पदार्थाः सर्वत्र निरूप्यंते पृथिवी दीक्षा तया अग्निर्दीक्ष
या दीक्षितेः। यया अग्निर्दीक्षया दीक्षितः। तया त्वा दीक्षया दीक्षयामीति। एवमुत्तरत्रापि चतुर्णा

मन्योन्यमर्थैनेदातत्पर्यवसानेनैवनिराकांक्षत्वादेकंवाक्यं।तर्हिसर्वमेवैकमस्तुऋग्विदीत्वादि
ऋक्लक्षणमित्यंतात्तत्राह।समेषुवाक्यभेदःस्यात्।चतुर्विधार्थप्रतिपादकत्वेनसमत्वंतच्चस्वरूपतो
भिन्नाइतिवाक्यभेदःस्यात्।अनुषंगवत्समताधिवाक्यभेदिकातस्मात्संदिग्धेषुअर्थैकत्वविभागेसा
कांक्षत्वंसमताचेतिहेतुत्रयमुक्तं।अनुषंगोवाक्यपरिसमाप्तिःसर्वेषुतुल्ययोगित्वात्।अनुषंगेणबुद्धि 48
व्यापारःक्रियतेकिंवाक्यांतरंप्रधानवाक्यवदितिप्राप्तउच्यते।अनुषंगोवाक्यपरिसमाप्तिःवाक्यस्य
परिसमाप्तिर्येनतदनावेःपरिसमाप्तमेववाक्यं।यातेअग्नेयाशयातनूस्तयोपसदमंत्राःशाखाभेदेनत
नूर्वर्षिष्ठेत्यादि।अनुषंगोवाक्यपरिसमाप्तिःतत्रहेतुःतुल्ययोगित्वात्।तुल्यएवयोगःसंबंधःआ
कांक्षायेषुयत्रयत्रतेःभ्यश्चाआकांक्षांपूरयतितथासर्वेषामित्यविशेषः।अनुषंगोपिमंत्रत्वेदे १२
तियामकःतस्मादनुषंगःसर्वेषां।व्यवायान्नानुषज्येत 49।मंत्रेप्राप्तोवयुनागच्छतां।संजंत्रेरंगाग्निसं
यहपतिराशिषेतिमंत्रत्रयंशिरसिअंगोद्धूलयोःश्रा एषांचक्रमेणाधारशेषेणांजनेविनियुक्तं।

अनुषंगंतेप्रादेवग्नंते।यत्रपत्नंतेततस्यैवेतिप्राप्तउच्यते।सर्वेषुमंत्रेषु × ठलं४

१४ तत्रगच्छतामितिक्रियापेक्षासर्वेषामस्तितथापिद्वितीयेमंत्रेयथाश्रुतमर्थोपयोगिनभवती।
तिगच्छतामितिवक्तव्यं।तन्नशक्यं।नप्रकृतावूहोविद्यतइतिनिषेधात्।ततोद्वितीयस्तावानेवमंत्रः
।तृतीयेसंदेहः।गच्छतामित्यनुषज्यतेनवेति।किंतावत्प्राप्तं।अनुषज्यतेआकांक्षायाविद्यमान
त्वात्।हान्नावाक्षेतिप्राप्तेउच्यते।अवायात्।नानुषज्यते।यत्रानुषंगस्यमध्येअवायोनभवतितत्रते
नप्रतिबंधोयेनगच्छति।यथाअग्निर्भूतानामधिपतिःसमावत्वित्यत्रमइतिलिंगवचनेयत्र
नसंगच्छतेतत्रमंत्रपाठेएवभस्यानुषंगः।तन्मावतुतेमावंत्विति।अत्रापिज्ञायतेनेदंपदमुत्त
रत्रानुषज्यतइतितस्माद्यत्रनअवायोनवायुक्तार्थपदपाठस्तत्रानुषज्यतइतिसिद्धं॥ ॥
॥ ॥इतिश्रीजैमिनिसूत्रभाष्येश्रीवत्सनाथविरचितेद्वितीयस्याध्यायस्यप्रथमपादः॥ १४
॥ ॥श्रीमद्वल्लभोजयति॥ ॥श्रीगुरुर्जयतु॥ ॥श्रीकल्याणंभूयात्॥ ॥श्रीरस्तु॥ ॥

बंध २६

25

जैमिनीयन्यायमालावाद्यपादविवरण

पत्र २७

१ ॥श्रीकृष्णाय नमः॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ॥श्रीमद्वल्लभाचार्यचरणकमलेभ्यो नमः॥ ॥श्री
विट्ठलनाथचरणकमलेभ्यो नमः॥ ॥श्रीमत्सद्गुरुचरणकृपया भावार्थचरणभाष्यं यथामति विवृ
यते॥ ॥भावार्थाः कर्मकर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते॥ ॥अथ द्वितीयाध्यायमाचि
ख्यासवः प्रकृतस्य सर्वेणासवत्रुपजीवकत्वरूपां संगतिं बोधयितुं मानाधीना मेयसिद्धिरिति प्रमाणा
नुआत्र कर्मभेदो निरूप्यत इति बोधयितुं शाबरभाष्याविरोधेन सर्वं विस्तरेण निरूपितं प्रथमाध्या
यार्थसंक्षेपेणानुवदंति। प्रथमेध्याय इत्यादि। अथातो धर्मजिज्ञासेति प्रथमाधिकरणे धर्मवि
चारं प्रतिज्ञाय को धर्म इति जिज्ञासायां चोदनालक्षणोऽर्थो धर्म इति द्वितीयेन विधिवाक्यलक्षणको
ऽर्थो धर्म इति लक्षणकथनेन तां पूरयित्वा। कथं चोदनालक्षण इति जिज्ञासायां तस्य निमित्तपरीष्टिरि
ति तृतीयेन तज्ज्ञापकपरीक्षां प्रतिज्ञाय। सत्संप्रयोग इति चतुर्थेन प्रत्यक्षाविषयत्वं तस्य बोधयित्वा। १
औत्पत्तिकस्तु शब्दस्यार्थेन संबंध इति पंचमेन शब्दस्य स्वतः प्रामाण्यं बोधितं। ततस्तत्रापि कथमि

देमित्याकांक्षायां कर्मके तत्र दर्शनादित्यादिनाधिकरणेन शास्त्रात्मकस्य वेदस्य नित्यत्वं स्थापितं । स्व(
ग्रेवार्थवादादयो वेदभागा विचारिता इति कृत्स्नो वेदो धर्मे प्रमाणमित्युक्तमित्यर्थः ॥ विशेषाकारेण
बोधनाय पादार्थान्वदिष्यंतः प्रथमस्य विशेषमाहुः तत्रेत्यादि । चोदनायाः प्रवर्त्तकत्वात्तल्लक्षणं(
विध्यंशं परित्यज्य शिष्टो धर्मे प्रमितिं जनयतीत्यपि तन्न सिद्धं । न च तस्याप्रमाण्यं शक्यं । विधेयेऽर्थे
धर्मत्वज्ञापनेन प्रामाण्यस्याग्रे वक्तव्यत्वात् ॥ द्वितीयस्यार्थमाहुः ॥ तत्रार्थेत्यादि । चोदनायास्त्वस्ति का
र्यद्वयं धर्मप्रमितिः धर्मे प्रवर्त्तनं च । तत्रार्थवादानां धर्मप्रमित्यजनकत्वादप्रामाण्यमाशंक्य तेषां
प्रवर्त्तनांशेषत्वमुक्तं स्वतः धर्मप्रमितिमजनयंतोपि स्वार्थप्रमितिमुत्पाद्येष्टसाधनतामुत्पादनेन(
प्ररोचनाद्वारा प्रवृत्तिं जनयिष्यंतीति । मंत्राणां तु व्रीह्यादिवदनुष्ठानोपयोगो नास्तीति तेषां प्रमित्यु
पयोगो वक्तव्यस्तत्र ते चेन्निरर्थकाः स्युस्तदा प्रमितावप्युपयोगो नास्तीत्यध्ययनाम्नावे तेषां वेदत्व(
मपि संदिग्धं न वेदेति तदमान्नावाप्य तेषां मन्त्रप्रवर्त्तप्रयोजनवज्ज्ञातदर्थे शास्त्रादित्यधिकरणे निरू

न्यायप्रा॰

२ पिता। अर्थवत्वे सति ते पि ब्राह्मणवद्धर्मप्रमितिं जनयिष्यंतीति। अतस्तेषामपि प्रमाणत्वं। न चात्र माना
भावः हि यतो हेतोर्मंत्रब्राह्मणे इति वाक्यादित्थं यज्ञस्य प्रमाणेन चान्यतरवैयर्थ्यं। प्रवृत्तेर्वमित्यादिनो
क्तरित्या कालज्ञे देनोन्नयसार्थक्यात्। न च ब्राह्मणेन ज्ञातार्थप्रमितौ तदर्थस्मरणमेव मंत्रैः कार्यत
इति स्मारकत्वमेव मंत्राणामस्त्विति वाच्यं उक्तवाक्ये तेषां प्रमाणत्वेन पृथगुक्त्या वेदे पि कांडद्वये दे
न प्रायत्राः कथनेन च तेषामपि प्रमितिजनने स्वतंत्रत्वात्। न च विधिवाक्यानां प्रवर्त्तनाबोधकत्वा
त्प्रवर्त्तनाश्चेष्टसाधनत्वरूपधर्मत्वप्रमितिजनकत्वमस्तीति तेषामेव धर्मे मुख्यं प्रामाण्यं। अर्थ
वादानां च प्रवर्त्तनापेक्षितप्राशस्त्यलक्षकत्वात्तदेकवाक्यतया धर्मप्रमितिजनकत्वं। नामधेया
नां च विधिवाक्यघटकत्वाद्धर्मप्रमितिजनकत्वं युक्तं। मंत्राणां तु कांडांतरवर्त्तित्वेन विधिवाक्यादि
प्रकृष्टतया तदेकवाक्यत्वाभावान्मानांतरसिद्धप्रयोगसमवेतार्थस्मारकत्वमेव युक्तमिति वाच्यं
तथा सति मानांतरसिद्धार्थानुवादकतया प्रामाण्यप्रसंगात्। न च स्मृतेरपि यथार्थज्ञानत्वेन प्रमा २

रूपत्वान्मंत्राणांस्मारकत्वेपिनप्रामाण्यहानिरितिवाच्यं। तथासतियथार्थज्ञानजनकत्वेनसर्व
तंत्रसिद्धेनलक्षणेनकार्यसिद्धावनधिगतार्थगंतृत्वरूपविशेषांगीकारस्यवैयर्थ्यापत्तेः। श्रोतंति
कृस्तत्वविरोधापत्तेःसिद्धांतभंगापत्तेश्च। अतःसूत्रानुरोधेनदृष्टजन्येज्ञानेऽनधिगतार्थावगति
त्वस्वरूपोविशेषःप्रमात्वप्रयोजकोऽवश्यमभ्युपेयः। तथासत्यनुवादकस्याप्रामाण्यमर्थादे
वायातं। ततश्चानुवादकत्वेनाप्रामाण्यस्यस्मारकत्वेनप्रामाण्यस्यचसांकर्यैवैरूप्यापत्तिरेकत
रनिर्णयस्याप्यसंभवापत्तिर्मंत्रजन्येज्ञानेस्मृतित्वप्रमितित्वयोःसमावेशेनसांकर्येतयोरपिजातित्व
हानिप्रसंगःसंस्कारोद्बोधकानामपिस्मृतिंप्रतिव्यापारवदसाधारणकारणत्वेनतेषामपिसप्तमप्र
माणत्वापत्त्याषट्प्रमाणवादभंगप्रसंगः। प्रमात्वस्यानुभवत्वव्याप्यत्वेनस्मृतित्वस्यचसाक्षाज्ज्ञान
त्वव्याप्यत्वेनतयोर्भेदस्यसर्वतंत्रप्रसिद्धतयातत्त्यागस्यायुक्तत्वंच। एवंस्मृतेःप्रमितित्वांगीकारेपरो
क्षज्ञानत्वेनशाब्दानुमित्योरपिस्मृतित्वापत्तिर्दुर्वारा। यथार्थज्ञानत्वस्यप्रमितित्वनियामकत्वेतदप

न्याभावा.

३ रोरू ज्ञानत्वस्य स्मृतित्वनियामकत्वेपि बाधकाभावात्। अतः स्मृतित्वप्रमितित्वयोर्भेद एवास्थेयः। त(
थास्मतिमंत्राणां स्मारकत्वात्प्रामाण्यं दुर्निरूपमेवेति दिक्। नत्वस्त्वप्रामाण्यं। तथापि मंत्राणां स्मर्तृ(
प्रमितिनियमानेषामनुष्ठेयस्मारणादेवार्थवत्वेऽङ्गत्वहानिस्तु न भविष्यतीति ज्ञापयितुमित्याकां
क्षायामाहुः। प्रमितिरेवेत्यादि। प्रमितिरेवांगं नाप्रमितिः। यदेव विद्यया करोति तदेव वीर्यवत्त(
रं भवतीति श्रुतेः। न चेदमंगोपासनाविषयमिति न कर्मांतरे तस्याऽङ्गत्वमिति वाच्यं। न्यायतो त्या(
दुः। तु नैभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेति विद्वदविद्वत्प्रयोगो वस्तुत्वयदि वा विद्ययेति श्रुतेरा(
म्नातत्वात्। सर्वकर्मसु प्रायेण विद्वद्वाक्यानां दर्शनाच्च। अतः कर्मानुष्ठानकालीनं वेदनं तत्कर्मफ
लएवातिशयं जनयतीत्यवश्यमभ्युपेयं। अन्यथा तद्वाक्यवैयर्थ्यापत्तेः। अत एव न्यायस्यात्रापि तौ
ल्याऽमंत्रस्यापि विद्याजनकत्वेनैव प्रामाण्यं न तु स्मारकत्वेनेति। न च विद्यापदेन स्मृतिरेवात्रोच्यत इ ३
ति वाच्यं। संकोचे मानाभावात्। स्मृतौ विद्यापदप्रयोगस्य क्वाप्यदर्शनाच्च। न च मंत्रजन्यप्रमितिरे(

वांगत्वे मंत्राणामंगत्वनंगप्रसंगादाग्नेय्याः आग्नीध्रमुपतिष्ठते इषे त्वेति शाखां छिनत्तीत्यादौ कथमा
णानां तृतीयाविभक्तीति शब्दादीनां पीडापत्तिरिति वाच्यं। विद्ययेति पदेनाग्रमिति रूपाख्याः स्मृतेः
वांगत्वं निवार्यते नान्येषामिति दोषात्। किंच। मंत्रस्य स्मारकत्वमपि किं विधिपदसहकारपदवत्त्वेन।
संबंधित्वेन वा। नाद्यः। इषेत्वादीनां तदभावात्। न द्वितीयः। सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधीत।।
सर्पराज्ञियाः ऋग्भिः स्तुवंतीति नानास्थलविनियुक्तमंत्रेषु प्रकृतस्मरणादौ व्याप्तेः। अतः प्रकर
णादिकं तत्सहकारीति वक्तव्यं। तथा सत्यावश्यकत्वाल्लाघवाच्च तस्यैव स्मारकत्वमस्तु। कृतं मंत्रेणान
र्थकव्यापाराभावे तस्य प्रयोगकरणत्वं कथं स्यादिति शंक्यं। तज्जन्यायाः स्मृतेरेव व्यापारत्वस्योक्तत्वा
त्। न हि स्मरणस्यैव व्यापारत्वे किंचिन्नियामकं वाक्यमस्ति। विनियोगविधिबलात्कल्प्यं तु विद्यावा
क्येनैव गतार्थत्वाद्बाधितं। तस्मात्स्मृतिद्वारैव मंत्राणां करणत्वमिति निश्चयः। तृतीयपादार्थमाह।
प्रसंगादिसादिप्रत्यक्षवेदार्थे विचार्यमाणे नित्यानुमेयवेदस्यापि स्मरणात्तन्मूलिकाः स्मृतयोऽपि

४ तथापि विचारितादित्यर्थः। तुरीयस्यार्थमाह। ततइत्यादि। उद्भिदं तत्परितनोदेशास्तत्र विधिवाक्येस्थिता
नामुद्भिदादिपदानां अर्थवादपरपर्यायत्वं वा मंत्रापरपर्यायत्वं वा तद्विधीनां गुणविधित्वं वेत्याश
ङ्किता। तत्र यदि तेषामर्थवादत्वं स्यात् स्वार्थबोधे समाप्तिः स्यात्। तथासति भिन्नवाक्यत्वप्रशोचना
दीनां गत्वं परिकल्प्य विधेयकवाक्यत्वेन प्रमाण्यं कल्प्येत। तासां चैषां नस्तोत्यर्थवादवद्भिन्नवाक्यत्वानाव
विधेकत्वानावान्नार्थवादत्वमुपपद्यते। भिन्नत्वाभावाच्चातत्त्वात्तेनैव मंत्रत्वं च नोपपद्यतइत्यानु
र्थक्येपर्यवसानमितितदनावाय तेषां नामधेयत्वमुक्तं समुदायज्ञानार्थं। यागत्रयसमुदायोदर्श
स्त्रीकांतरसमुदायः दर्शपूर्णमासइतिज्ञानार्थं। तत्प्रयोजनमाह। नदीत्यादि। तस्यापि प्रयोजनमाह।
अतइत्यादि। अंगमिति। यदेव विद्ययेत्यत्र तस्यापि संग्रहादिति। ततः एतन्निर्धारोत्तर। संदिग्धेषु वा
क्यन्वेवात्। अर्थाद्वाकल्पनेकदेशत्वादितिसूत्रद्वयेनार्थवानानामर्थसामर्थ्यस्य च संदेहवारकत ४
याप्रमाण्यमुक्तमित्यर्थः। नन्वेतन्मते। नामधेयानां समुदायज्ञापकतया स्मृतीनां च नित्यानुमेयवे

दबोधितकर्मज्ञापकतया मंत्राणां चानुष्ठानकाले तत्तत्प्रमितिजनकतया धर्मप्रामाण्यमुक्तं॰ चोदनायास्तु
प्रवर्त्तकत्वेनार्थवादानां च प्रवर्त्तनांशेषत्वेन धर्मप्रमितिजनकत्वाद्धर्मप्रामाण्यान्नावेकथंकृत्स्नस्य
वेदस्य धर्मप्रामाण्यमित्याकांक्षायां तयोस्त्वप्रकारमाह॥ विधेर्नास्येत्यादि॥ यद्यपि विधेर्नाः प्रवर्त्त
कस्तथापि चोदनाया धर्मलक्षणतया धर्मत्वं ज्ञापयन्नेव प्रवर्त्तयतीति तद्वारा तस्याप्यस्ति धर्मप्रमिति
जनकत्वं धर्मस्य फलशेषतया परतः पुरुषार्थत्वेन स्वर्गकामादिपदबोधितस्य फलस्य तज्जनकक
र्मोत्कर्षबोधिकाया अर्थवादिक्याः स्तुतेश्च पुरुषैरर्थ्यमानत्वरूपं परमदर्थत्वं तत्संपादत्वादस्ति तेषाम
पि धर्मप्रमितिजनकत्वमतः कृत्स्नो वेदो धर्मप्रमाणमिति एवं चाधिकरणे सिद्धमित्यर्थः॥ एतेन॰ पूर्वं प्रमा
णस्य पायांपादे नाख्यस्य निर्णय इति जरद्वार्त्तिके यत्प्रथमपादे एव प्रमाणचिंता समाप्तिस्त्रिपाद्यां तु
कथं लक्षणो धर्म इति धर्मस्तु नाप्रतिज्ञातः प्रमाणप्रकारो बोधित इति ज्ञा वरनाष्यविरुद्धमंगी॥ क्रियते
तत्रास्मत्संमतमिति बोधितं॥ एवं च पूर्वोक्तं सर्वं संक्षेपतो निरूप्य प्रस्तुतमवतारयंति॥ अतः परमित्यादि॥

तत्रेति· अध्यायरूपवाक्यस्यार्थं आख्यातव्यः। यद्यप्यनेक इति। नामधेयपादेनानानाम्नां प्रतिपाद
नादनेकः। तदापि किं मन्त्रब्राह्मणयोः पदे पदे विधिवाक्यस्य वा पदे पदे धर्मः प्रतिपाद्यते न तु केषुचि
देवेति शङ्कायां तदर्थं तन्निवृत्तये प्रथमाध्याय आरभ्यत इत्यर्थः। तेन सर्वो वेदो विधिवाक्यतन्त्रं वा त
दाहरणं। अध्यायार्थमुक्त्वा पादार्थमाहुः। तत्र प्रथम इत्यादि निरूप्यत इति धर्मभेदज्ञापनार्थं निरू
प्यते। एवं पादार्थं निरूप्य तावत्तां संज्ञाया निवृत्तेर्विशेषतो वक्तुमाद्याधिकरणमवतारयन्ति। तत्रेत्या
दि। विनिगमनमाहेति। विनिगम्यते अनेनेति विनिगमनं· केषुचिदेव पदेषु निरूप्यत इत्यस्य नियाम
कं हेतुमनेनाधिकरणेनाहेत्यर्थः। व्याकुर्वन्ति। यो विधीयत इत्यादि। एवं सामान्यतः सूत्रार्थमुक्त्वा
विशेषतो वक्तुमाहुः कर्मेत्यादि। पुरुषयत्ननिष्पाद्यक्रियारूपधर्मवाचकाः कर्मशब्दाः के इत्यपेक्षा ५
यां तान् बोधयितुं तेषामर्थमाहेत्यर्थः। व्याकुर्वन्ति। इदमित्यादि। इदं· क्रियावाचिनां धातुत्वात् धातुशब्द
ताः सर्वधातुष्वनुगतरूपं यत् क्रियासामान्यं स भावः स अर्थो निधेयो येषां ते भावार्थाः। तादृशा ये

नृष्टास्ते कर्मवाचका इत्यर्थः। ननु धर्मवाचकनिर्धारार्थं प्रवृत्तस्याचार्यो धर्माधर्मादिसाधारणक्रिया
सामान्यवाचकं किमिति वदतीत्यत आह। धर्मेत्यादि। तथा चात्र धर्माधर्मसाधारणक्रियासामान्य
व्याप्यं यद्धर्मपदप्रवृत्तिनिमित्तमन्यक्रियासामान्यं तत्प्रतिपादयंतं विशेषानालिंगितासामान्यबु
द्धिर्न भवतीति विशेषालिंगनाद्यजनदानादिरूपविशेषप्रतिपादका न तु तच्छून्यकेवलक्रियावाच
का इति भावार्थः। कर्मन्वाष्टा इत्यनेनोक्तं भवति। यद्येवमभिप्रायो न स्यात्तदा भावार्थपदं न ब्रूयात्।
आख्यात्यधिकरणे जातेऽपदशक्तेरंगीकृतत्वेन तावतैव नृष्टार्थयोर्नित्यताप्यानिर्वोढुं शक्यत्वात्। अते
यजत्यादयो धातुत्वेन रूपेण क्रियासामान्यं यजतित्वादिना प्रतिनियतरूपेण क्रियासामान्यव्या
प्ययागादिसामान्यरूपं विशेषं प्रतिपादयंतीत्यर्थः। नद्वार्त्तिकेऽपि धात्वर्थव्यतिरेकेण यद्यप्ये
बानलक्षते। तथापि सर्वसामान्यरूपेणैवावगम्यत इत्युक्तं। अतो धात्वर्थबोधकैः पदैः सामान्यस्था
नेसेव बोध्यते। तयैवानुगतप्रतीतिनिर्वाहात न नु जात्यंतरमिति बोध्यं। अत्र धर्माभिव्यत्ववादिनां

कृतानन्वित्यादि। यद्यनेको धर्मः प्रतिपाद्यते तदा भावनाभावः तस्मान्नेति यावत्। सोऽर्थो येषां ते भावा
र्थाः। आख्यातशब्दास्तेभ्यः क्रियावाचिभ्य एव धर्मः प्रतीयत इत्युक्तं। किं क्रियायाः रूपद्वयनिरूपणे
न। न च कालांतरभाविफलानुत्पत्तिप्रसंगः क्रियायाः क्षिप्रनष्टत्वेनावस्थायित्वेऽपि तज्जन्यस्यापूर्वस्य फलप
र्यंतवस्थानेनोपपत्तेः। अतोऽर्थरूपद्वयनिरूपणमित्यर्थः। अत्र समादधते। नस्यमित्यादि। यदि
पुरुषः क्रियामात्रं धर्मो न वेत्ति तदा त्वदुक्तरीत्या निर्वाहाद्रूपद्वयं न वक्तव्यमेव। न हि तथा। किं त्वतींद्रि
यो वेदैकसमधिगम्यो यागादिः स्थिरो धर्मः तत्र कथं स्थिर इत्याकांक्षायां सामान्यं नित्यमिति यजतिबो
धितयागसामान्यरूपेण नित्यतास्ति अतींद्रियत्वरूपो विशेषस्तु तत्र वर्त्तते केवलस्य सामान्यस्या
तींद्रियत्वादतो यागस्य नित्यातींद्रियरूपत्वाद्रूपद्वयकथनं युक्तमित्यर्थः। ननु विहितक्रियावि
शेषं कुर्वाणं दृष्ट्वायं यजतीति प्रत्ययादभिलापाच्च तस्याः प्रत्यक्षत्वनिश्चयात्कथमतींद्रियत्वमत
तआह। दृश्येत्यादि। यजिर्देवपूजासंगतिकरणदानेष्वर्थेषु इति प्रथमातिक्रमे कालणानार्वष्ट

वषट्जैवात्रार्थः साच्चात्र द्रव्यकृता॥ किंच यजतिचोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वादिति चातु
र्थिकसूत्रे द्रव्यदेवताक्रियासमुदायो याग इति लक्षणं यागस्य सिद्धं॰ तथा द्रव्यदेवते यागस्य रूपमिति सा
मिरूप्याधिकरणेपि सिद्धं। तयोश्च नोदासीनयो रूपत्वमपि तु संबद्धयोरेवेति द्रव्यदेवतासंबंधो यागः
। तत्र देवतास्वरूपं चेतनतया विग्रहवत्तया च वैयासे दर्शने सिद्धं अत्र चाग्रे तद्विरोधेन व्युत्पाद्यं।
गीतायां च देवान्भावयतानेन ते देवा भावयंतु वः परस्परं भावयंतः श्रेयः परमवाप्स्यथेति कथना
त्। परस्परभावनस्य च श्रद्धया यजनेन। तस्य द्रव्यस्य प्रीत्या स्वीकारेण च संभवात्तेन विनाश्च संभ(
वाच्च प्रीतिहेतुत्वेन स्वीकार एव संबंधः। स च देवताया अतींद्रियत्वात्परात्मधर्मत्वाच्चातींद्रियः। न
च स्वजनकव्यापाररूपस्य स्वीकारस्य देवताहर्त्तृत्वेन यजमानाहर्त्तृत्वेन च देवता यजतीति प्रयो
गापत्तिर्देवदत्तो यजतीति प्रयोगानापत्तिश्चेति वाच्यं। देवतानिष्ठस्य तादृशव्यापारस्य फलरूप।
धात्वर्थत्वेन कर्मनिष्ठतया यजतीति प्रयोगसंभावनाया एवाभावात्। तादृशप्रयोगस्य व्यापारा(

७ अथेकर्तृत्वेवानुशासनात् यजमाने यजतीति प्रयोगाभावसंभावनाया अप्यभावात्। ऋत्विक्षु तु ताद
शप्रयोगस्य योधायुध्यतीत्यादिवदिष्टत्वात्। प्रैषे होतर्यजेति प्रयोगदर्शनात्। अतो व्यापाररूपस्य
यागस्य प्रसक्तत्वेपि फलरूपस्य यागस्यातीन्द्रियता निष्प्रत्यूहेत्यर्थः। ननु भवत्वेवमतीन्द्रियत्वं तथा
पि होमानंतरं त्यक्तद्रव्ये देवता तत् स्वीकरोति। द्रव्यं च व्रीह्यादिकमनित्यमिति जन्यस्य होमोत्तर
भाविनः स्वीकारस्य कथं नित्यत्वमत आह। द्रव्यं चेत्यादि। अपत्रपतपुरोडाशकर्मन्नतं समर्पितं। त
स्यानुमत्यपयोनिमाच्छिनत्यास्ततवशाश्च नवत्तस्ततवशा येजन्मा प्रजापतेरस्य भवत्तत्तरायत्त
दस्योभवदित्यादिष्वर्थवादेषु द्रव्यस्यालौकिकत्वं सिद्धं। न चार्थवादानां स्वार्थेऽप्रामाण्यं। प्रजाप
तिर्वरुणायाश्वमनयदित्यस्य प्रतिग्रहेष्ट्यर्थवादस्यावधारणानिर्णायकताभावे तस्या इष्टेर्दातृका ७
र्तृकत्वं न तेन निर्णीयेत। तेजो वै घृतमित्यादिना घृतादेः शार्कराञ्जनादिकरणता च न निर्णीयेत। एवं
सर्वत्रेति तेषां विधिस्तावकत्वेपि स्वार्थे प्रामाण्यमिति ज्ञातव्यं॥ किंच। श्रीभागवते पुरुषसूक्तविवर

णाध्याये यज्ञसंज्ञानां पुरुषावयरूपत्वं प्रतिपाद्य इति संगतं संज्ञाः पुरुषावयवैरहं। तमेव यज्ञं
पुरुषं तेनैवायजमीश्वरमिति ब्रह्मणोक्तमिति द्रव्यादीनां सर्वेषामेव संज्ञानामलौकिकत्वं निर्बाधं।
अतो यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्नित्यादिश्रुतिसिद्धस्य प्राथमिकयागस्या
लौकिकैरेव पदार्थैः सिद्धिः। याश्चात्मेषु तु कर्तृषु तादृशायोग्यतायाश्चाभावेन तेषां संज्ञानामसन्निधा
नात्संस्करणादिभिः स्तैस्तैः संस्कारैस्तैते अलौकिका पदार्थास्तेषु तेषु लौकिकेषु द्रव्यादिषु सन्निधाप्यं
ते। प्रतिष्ठाऽऽवाहनादिसंस्कारैः मंत्रैर्देवतावत्। अन्यथा लौकिकैरेव द्रव्यादिभिर्यागनिष्पत्तेः संस्का
राणां वैयर्थ्यमेव स्यात्। संस्कारबोधकप्रमाणानि च पीडेरन्। अतो लौकिकानि द्रव्यादीनि तेषामधि
ष्ठानान्येव। देवतायामर्चिवत्। अधिष्ठानं तद्द्रव्यादीनां चाविहितनिषिद्धद्रव्यपुरुषादिसंसर्गेण अ
लौकिकस्य तस्य तस्य द्रव्यादेस्तत्तत्तिरोधानमेव। मर्त्ते इव संसर्गेऽङ्गारो च ततो देवताया इव। अतोऽस्मा
न्मंत्र विरामं स्विमास्थैत। यस्य सर्वाणि हवींषि विनश्येयुर्दुष्येयुरपहरेयुर्वेत्यादिनोक्तमार्त्तिनाशाय पिंडः सं

९ सर्गवशाद्धविषां लौकिकत्वएव·प्रायश्चित्तं द्रव्यांतरादानादिकं च प्रकारांतरेणदेवतेत्यादिस्तूर्यथर्थमिति।
नोक्तस्मृतीनां विरोधः। नापि शेषाख्यवदांननाशेप्याक्षितिस्तत्रस्य·प्रमादादिरूपापराधेननष्टपदवस्थाद
वदानादलौकिकस्यतस्यतिरोधानादिति। एवं यागीयद्रव्यस्वरूपेति निश्चितेतद्द्रव्यं नित्यमलौकि
कमेव देवता चालौकिकीनित्येतितत्स्वीकाररूपस्ययागस्यक्रियावदनित्यतायांन कोपिहेतुः। तत्त
थाचपरस्परं नाव्ययंतत्स्मृतिगतात्वाक्याद्यागजन्यफलभोगपर्यंतंद्रव्यस्वीकारजन्यप्रीतेरप्यवस्था
नमितिस्वीकारस्य स्थिरत्वरूपं नित्यत्वं द्रव्यदेवतयोश्च भगवदवयवत्वेन स्वरूपतो नित्यत्वमित्युभय
मपि निर्बाधमित्यर्थः। ननु तथापि सिद्धसाध्यस्वभावाभ्यां धात्वर्थो द्विविधः। तयोः। अन्योन्याद्यानुकू
लात्माभावनासाध्यरूपिणीत्यभियुक्तोक्तेः साध्यरूपस्य धात्वर्थस्यानित्यत्वाच्चेष्टारूपस्यतस्यनश्वर
त्वमेवेत्यत आहुः। नहि चेष्टेत्यादि। द्वितीयस्कंधषष्ठेषु मन्नारवाक्येषु चातुर्होत्रंचमस्तमेत्यनेन क्रियाया ९
अपि पुरुषावयवेषु गणनालौकिकी चेष्टान यागः किंतु तदधिष्ठानकं क्रियांतरमतीन्द्रियं स इति न

तस्यापिनश्वरत्वमतोविनाशोऽदृष्टंवाकिमर्थंकल्पनीयमित्यर्थः॥वाक्यानितु॥यदास्यनाभ्यान्नलिना
दहमासंमहात्मनः॥नाविदंयज्ञसंभारान्पुरुषावयवादृते।तेषुयज्ञस्यपशवःसवनस्पतयःकुशाः॥इ
दंचदेवयजनंकालश्चोरुगुणान्वितः॥वस्तून्योषधयःस्नेहारसलोहमृदोजलं॥ऋचोयजूंषिसामानि
चातुर्होत्रंचसत्तम।नामधेयानिमंत्राश्चदक्षिणाश्चव्रतानिच॥देवतानुक्रमःकल्पःसंकल्पःस्तंत्रमे
वच।गतयोमतयश्चैवप्रायश्चित्तंसमर्पणं॥पुरुषावयवैरेतेसंभाराःसंभृतामया।इतिसंभृतसंभारःपु
रुषावयवैरहं।तमेवपुरुषंयज्ञंतेनैवायजमीश्वरं।ततस्तेभ्रातरइमेप्रजानांपतयोनव॥अयजन्व्य
क्तमव्यक्तंपुरुषंसुसमाहिताः॥इत्यादीनिद्रष्टव्यानि॥तस्माद्यागस्यनित्यत्वंस्थिरत्वंचनिर्बाधमितिसि
द्धं॥नत्वाधुनिकाःक्षणिकंयागमंगीकुर्वंतिनैयायिकाश्चादृष्टात्मकंधर्ममतःकथमेवमित्यतआहुः॥
येइत्यादि॥ननुयद्येवंतदा।धर्मःस्वनुष्ठितःपुंसांधर्मःक्षरतिकीर्तनादितिवाक्ययोर्विरोधः॥पूर्वस्मि
न्ननुष्ठानंविषयत्वेनक्षणप्रध्वंसिन्याःक्रियायाःद्वितीयस्मिन्नाशप्रतियोगित्वेनाक्रियाजन्यस्यफलप

९ र्थंतस्थायिनोऽदृष्टस्यचविषयीकारणादितिचेन्न।सर्ववाक्येष्वनुष्ठितपदेमुष्टुर्थेकेनसुनाऽनुष्ठानेवै
धप्रकारस्यद्योतनेनतद्विशिष्टालौकिकीक्रियाविषयीक्रियतेनतुकेवला।तथासतिप्रकारसाध्येन(
नित्याक्रियापिविरोधःअतोयागस्यरूलौकिकत्वेजातिवदायात्मवेतिसेवधर्मपदेनाभिप्रेयतेनकेवला
अतोनतद्विरोधःद्वितीयवाक्येपिकीर्त्तनादेवताप्रीतिविषयत्वरूपधर्मस्यसंनिधानंपुरुषार्थनिवृत्ति
तदनुष्ठानेतेनतस्यापिविरोधःअतोयागस्यरूलौकिकत्वकल्पनंधर्मस्यचादृष्टत्वकल्पनंसर्वोक्तप्र(
काराज्ञानादेवसमर्थः।तेनसिद्धमाहुः।यावार्थाइत्यादि।क्रियार्थोयः।क्रियायतीयतइत्युक्ता।भावार्थाः
कर्मशब्दास्तेभ्यःक्रियाप्रतीयेतइतियदुक्तंतेन।सर्वेषुपादितरीत्यासिद्धाख्यातपन्नधात्वर्थबोधकाये(
कर्मशब्दाइतिसूत्रेयागस्यार्थइत्यर्थः।अग्नयेइदंनममेतियागवाक्यानुरोधाद्देवतोद्देशेनद्रव्यत्या
गएवयागोस्तु।दानस्यापियज्यर्थत्वात्।देवद्विजेवात्रग्राह्यानदानेमिसत्रनियामकाभावात्।दानंचप्र(९
त्यक्षमेवेतिकथमतींद्रियतेत्यत्रआहुः।दानमित्यादि।उद्देश्यायाःदेवतायाअतींद्रियत्वाददतींद्रियमिति

लोकप्रयोगो बहिर्दृष्टो न तु शास्त्रदृष्टान्तो न तात्त्विक इत्यर्थः ॥ क्रियायामप्यनुरूपायामयवतीं ड्रियत्वमु
क्तं तत्र व्यभिचारमाशंकते । नन्वित्यादि । वाहीन वहंति अग्निषोमीयं पशुमालभेतेत्यादि विहिता अपि ते
तथेति दृष्टांते नान्यासामपि क्रियाणां तथात्वस्य शाक्यवचनत्वात् सर्वोक्तमसंगतमित्यर्थः । तत्र समादध
ते । नेत्यादि । तदावाहनादिति । हविष्कृदेहि । उन्नो हि वै देवानां शमितारावित्यादिभिस्तत्कर्त्र्यावाहनात् ॥
तस्य तिरोभाव इति । अलौकिकक्रियायाः कर्तुश्च संनिधाननिवृत्तिः । तथा च व्यभिचाराभावान्नासंगतमि
त्यर्थः । एष ह्यर्थो विधीयत इति । सूत्रभाष्यं व्याकुर्वंति । स एवेत्यादि । इहेंतो योतीद्रियः स्थिरपुरुषात्म
स्थिरश्च को नित्यः एष इति पदेनोक्तः स एवार्थः पुरुषार्थः । लौकिकस्तु न तथा तस्मान्नश्य इत्यर्थः । नन्वयमेवार्थ इ
त्यत्र किं गमकमित्यत आह । अत एवेति । स्थिरत्वेन विद्यमानत्वादेव पुरुषश्चोदनया तस्मिन्प्रवर्तते ॥
अन्यथा यदि यागादिधर्मः स्थिरो न स्यात् किंतु क्षणरूपः साध्य एव स्यात्तदा प्रयत्ने च प्रयत्नाभावात्प्रयत्न
सिध्यर्थं प्रयत्नाभावाद्विधिवाक्यस्य कथनमेव न स्यात् । यदि सिध्यन् स्थिरो भवति तदर्थं यत्नोपदेशः । य

१० तत्सिध्यतु कदापि न स्थिरं सर्वे दैवसाध्यावस्थं तत्साधनोपदेशस्य व्यर्थत्वादिति। नन्व पूर्वमेव यागस्य सिद्धा
वस्थेति चेत्। न। तर्हि तस्य कर्माश्रितत्वापत्तेः सकर्मकधात्वर्थीय सिद्धावस्थायाः कर्मण्येवोदनादौ प्राय
शो दर्शनात्। यागस्यापूर्वपर्यंतत्वे तस्य करणत्वाय व्यापारांतरकल्पनापत्तेश्च। न च सिद्धांतेप्ययं दोष
इति वाच्यं। देवताप्रीतेरेव व्यापारत्वांगीकारात्। न च वैयधिकरण्याद्यजमाने तत्फलानावप्रसंग इति
वाच्यं। राजप्रीत्यात्मसेवकेषु फलदर्शनात्। यजमानेषु विषयतासंबंधेन देवताप्रीतेः सत्वाच्च। अ
तः सिद्धांते न कोपि दोषः॥ किंच। धर्मो नित्यत्ववादिमते क्रियात्वादिजातौ पदशक्तीरंगीकार्या। सा च
हृतिमतीति तत्स्थित्यर्थं धर्मिणः प्रावाहिकी सत्ता अभ्युपगंतव्या। अहोरात्रन्यायेन कल्पस्य कल्पपूर्वक
त्वात्तद्रात्रिरूपे प्रलये सर्वनाशात्। ये पुनर्जीवंति तेषां स्वापाच्च। क्रियाप्रवाहस्योपरमे तस्या जातेरना
धारत्वापत्त्याकाशादौ तत्स्थितिर्वा निराधारत्वं वा कल्पनीयं। शाब्दबोधसमये च क्रियाया आक्षेपल
भ्यत्वं कल्पनीयं। कर्मदर्शनादिश्रुतीनां च स्वार्थे तात्पर्यराहित्यं कल्पनीयं। नित्यत्ववादिमते तु न केप्य १०

ते दोषाः। नापि कल्प्यते इति महानेव गुणः। प्रलये तस्य स्थितिस्तु वेद एव। कर्मणां व्यापकत्वाद्यंगीकारेण
वेदरूपेणादृष्टद्रव्यत्वस्योभयोरपि वादिनोः साधारणत्वात्तत्रैव धर्मसमवायस्य युक्तत्वात्। वेदांतिम(
ते तु स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः। कालं कर्मस्वभावं चेत्यादिपुराणवाक्याच्च नित्यक्रिया(
या ईश्वरधर्मत्वात्परमेश्वर एव स्थितिर्येषां निःश्वासरूपेण वेदस्येति। एवं सति कल्पादावध्यय(
नक्रमेण यथा वेदस्याविर्भवति तथाधीतवेदानां यजमानानां क्रियाभिस्तत्तद्देशने दोनाः लौ
किकी क्रियासन्निधापिता भवति येन च यदर्थं यावती स्वक्रियया सन्निधाप्यते तस्य तत्फलं भोगपर्यं
तं देवताप्रीतिद्वारा तत्संबद्धां तां द्रियेवती। हेतौ तात्पर्यं वैधपदेनाह। एषपदेन चरमसूत्रमुच्यते। सर्वं वैधक्रि(
याफलं धर्मशब्दमिति। एवं स्थितायां तस्यां विधिः पुरुषं प्रवर्तयतीति न किंचिदनुपपन्नं। तदेतत्सर्वं(
मभिसंधाय प्रसिद्धमाह। तस्मादित्यादि। सूत्रयोजनयैवं बोध्यं। हि यतो हेतोर्विधीयते पुरुषप्रय(
त्नेन निष्पाद्यते। एषः धर्मत्वेन विवक्षितोऽर्थः पुरुषार्थत्वेनाभिधेयः। कस्याभिधेयः। कश्च धर्म इत्यस्य(

कांक्षायामाह भावार्था इत्यादि । तथा च सर्ववधातुवाच्या क्रियासामान्यार्थे केष्वो यागादिकर्म वा वक्तश
ष्टः प्रतीयमानाया क्रियायाः पुरुषनिष्ठा या सा तेषामर्थ इति स धर्म इत्युक्तं भवतीति अर्थस्तु ॥ ॥स
र्वेषां भावोऽर्थ इति चेत् ॥ ॥भावोऽर्थः कर्मशब्देभ्य एव धर्मः प्रतीयते इत्यत्र शंकते इत्याहुः यदीत्यादि । क
थं सर्वे भावार्था इत्यत आहुः । क्रियेत्यादि । क्रियावाचिनो हि भ्वादयो धातुसंज्ञां लभंते इति धातवः स
र्वे क्रियावाचका एवेत्यवधारणेनाष्टाध्यायः सर्वे धातुजाः न च प्रकृतेः क्रियावाचकत्वेपि प्रत्ययस्या
न्यार्थत्वे प्रकृत्यर्थस्य गुणत्वात् सर्वेषां क्रियावाचित्वमित्येवं समाधेयं । रूढस्य येनापि भावो
भिधीयते । वा । यथा पाकः पाठ इत्यादि । यत्र च द्रव्यादिकमभिधीयते तत्रापि प्रयोगविचारे क्रिया
साहित्यमायात्येवात्रातः सर्वेभ्य एव धर्मप्रतीतिरिष्यतामिति पूर्वपक्षिणो मतं इति चेदित्यनेना
नुवदतीत्यर्थः ॥ ॥समाधानमवतारयंति परीत्यादि । ननु परिहरे कुतः स्वातंत्र्यमित्यत आहुः । ध
र्मेत्यादि । यः कश्चिद्यत्र कुत्रचित्प्रवर्तते । तत्फलार्थमेव प्रवर्तते । न हि प्रयोजनमनुद्दिश्य मंदोपि प्रव

११

र्त्तत इति लोके दर्शनात् । अतो धर्मत्वमित्यर्थमपि यः प्रवर्त्स्यते सोपि किं चित्फलार्थमेव प्रवर्त्स्यते । आ
नार्थत्वा हेर्न भवति स्तु दासीनतया धर्मः प्रत्याय्यते न तु पुरुषार्थतया । अतो धर्मत्वमिति संपादनेनावा
र्थकर्मशब्दत्वमेव न प्रयोजकं किं तु पुरुषस्य या अपेक्षा सापि प्रयोजिका । धर्मस्य पुरुषार्थत्वात्तास्व
तः सापेक्षानपेक्षविभागस्तत्र कृदन्ताह । तेन सत्त्व द्वयं परिहारे इत्यर्थः ॥ ॥ येषामुत्पत्तौ स्वप्रयोगेषु ।
प्रोपलब्धिस्तानि नामानि तस्मात्तेभ्यः परा कांक्षानपेक्षत्वात्स्वप्रयोगे ॥ ॥ आकुर्वंति स्वशब्दं इत्यादि ॥
स्वशब्दः स्वीयत्वेनार्थवाची । तन्न देवोप्युपमानोपमेयधर्मवाच्यपेक्षार्थो । उत्पत्तावितितु सतिसप्तमी । तथा
च येषां शब्दानामर्थे उत्पन्नः सन् व्यवहारकालेति ष्ठति तेषां नाम इति संज्ञा । निरुक्ते नामाख्यातइत्यादि
शब्दविभागवचनतः । अतः स्वयं न भवंति कारकतया क्रियायोगे षा वाक्ये भवंति नामयंति स्वार्थमाख्याता
र्थं प्रति । स्वार्थमाख्यातार्थं प्रयोजनाय शेषभूतं कुर्वंतीति नामसंज्ञा तेषां शब्दानामर्थस्य परार्थत्वं ज्ञा ।
पिका । अतः परार्थत्वेन स्वातंत्र्याभावाद्याकार्यबोधावसरे नामस्योधर्मः पुरुषार्थतया न प्रतीयतइ

स्ययमर्थो नाम शाब्दार्थकथनेन बोध्यत इत्यर्थः। तस्य बोधनस्य प्रकृतोपयोगमाहुः। तस्मादित्यादि तथाख्या
नतकुर्वणेत्यादि· उदाहरणं यथेत्यादिना तत्वादित्याद्यंशं विष्ट एवं तत्पदेरुच्यते· तस्मात्तेम एवताहशोध
मेः प्रतीयते। अयमर्थः। पचतीत्यादौ यद्यपि केवलेन धातुना केवलेनाख्यातेन च नावुनाप्रतीत्यना
वा उभयसमुदायादेव प्रतीतेः कस्यार्थो भावनेति निष्ठेतुं न शक्यते· तथापि पाकः पक्तिः पचनमि
ति प्रत्ययानामन्यान्यत्वेपि धात्वन्वयात्पचनं धात्वर्थः। एवं पचति गच्छति स्वपितीति धातूनामन्यान्य
त्वेपि प्रत्ययानन्वयाद्भावनाख्यातार्थ इति निश्चीयते। सा च साध्यत्वेनाविधीयमानो व्यापारविशेषः
क्रियासामान्यात्मकः। धातुविशिष्टाख्यातेषु सर्वेषु क्रियापदमिति प्रतीतेः। सा च प्रतीतिर्न धातुनि
बंधना· तेषां क्रियाविशेषार्थकत्वात्· अतो विशेषाणिंगितत्वेपि क्रियासामान्यमाख्यातेनैवाच्यत इ
त्याख्यातार्थो भावना पचत्यादिरूपेष्वाख्यातविशिष्टपदेषु तेषु क्रियांतराकांक्षानुदया क्रियांतरा १२
कांक्षाव्यापकतावच्छेदकं यत्तस्य रूपं तदेव साध्यत्वं· तेन रूपेणाभिधीयमानो व्यापारः स्वात्मनि

ष्टः प्रयत्नः शरीरादिनिष्ठः स्पंदश्च। स यद्यपि नानाक्रमिकश्च तथापि महात्मना एकबुद्धिविषय
त्वादेकः। तस्य च पुरुषधर्मत्वं फलोत्पादानुकूलत्वं च प्रत्यक्षादिनैव निश्चीयते। तस्मात्पुरुषार्थो धर्मः।
आख्यातैरेव प्रतीयत इति धर्मप्रमितौ नावार्थिकमेव शब्दत्वमात्रं न प्रयोजकं किंतु पुरुषापेक्षापि प्र
योजिकेत्येतद्बोधनायायं विभागः कृतो न तु नाम्नां धर्मप्रमितिजनकत्वापेत्यर्थः। तथा चाख्याता
नां पुरुषनिष्ठाद्यक्रियावाचकत्वात्तेष्वेव पुरुषनिष्ठाद्यक्रियारूपत्वेन धर्मप्रमितिरित्युक्तं भवति
॥ ॥ अग्रिममसूत्रमवतारयंति। लिंगर्थे विशेषमाहेति। ननु नामाख्यातानां सिद्धतया साध्यतया च
धर्मः प्रतीयते। चोदनायां तु तत्र प्रवृत्तिमात्रं जन्यते॥ किंचालक्षणं ह्यसाधारणो लक्ष्यनिष्ठो धर्मः॥ चो
दनायां तु वाक्यरूपत्वाद्वेदादिनिष्ठा न तु धर्मनिष्ठेत्यतोपि तस्याः कथं धर्मलक्षणत्वमित्याकांक्षायां तस्या
श्च लक्षणत्वार्थं लिङर्थे विधौ प्रवर्त्तकत्वेपि वक्ष्यमाणमित्याप्रमितिजनकत्वरूपं विशेषमाहेत्यर्थः॥ ॥
॥ चोदनापुनरारंभः॥ ॥ तमेव विशेषमनुस्मारयंति। चोदनेत्यादि। चोदना हि प्रवर्त्तकं वाक्यं। तद्धर्मल

१२ क्षणत्वेन शास्त्रार्थं मेनक्तं॰ तच्च पुरुषप्रवृत्तिविषयत्वेन धर्मं प्रतिपादयतीति तस्याश्चोदनायाः तस्मिन्
पुरुषधर्मत्वपरिज्ञापकत्वं॰ अतस्तया लिङंशेन अपूर्वमात्मवत् कारकविशेष्यतया धर्मो न प्रतिपाद्यत इ
ति तेन रूपेण धर्मप्रमित्युत्पत्तये पि पुरुषविशेषणत्वेनैव धर्मप्रवृत्तिः संहितया तस्मिन् पुरुषधर्मत्वे
अज्ञाते पि तत्र पुरुषप्रवृत्तिः संभवति। लोकिके घटानयनादिवाक्ये कर्थज्ञानादुरेव प्रवृत्तिदर्शनात् तर्हि
तस्य विशेषणस्य किं स्वरूपमिति चेत्॰ तच्च विशेषणत्वमोदासीन्यप्रच्युत्या आत्मसान्निध्यापादनार्थं प्रवृत्ति
रित्येतावान् लिंगंश्रे विशेषः तथा चानयाशैल्यातया धर्मप्रमितिर्भवतीति तस्मिन् लक्षणत्वं निर्बाधं
न च वैयधिकरण्यदोषः चोदनालक्षण इत्यत्र चोदनाप्रमितत्वस्यैव विवक्षितत्वेन तदभावादित्यर्थः
ननु सिद्धस्वभावे स्थिरे धर्मे चोदनाप्रत्यायितप्रवृत्तिविषयत्वाभावा॥ लक्षणे व्याप्तिरिति चेत् तत्राहुः १२
धर्मप्रमितिरित्यादि चोदनाप्रत्यायितप्रवृत्तिविषयक्रियाभिव्यंग्यत्वेन रूपेण स्थिरस्यापि धर्म
स्य प्रमितिर्भवत्येवेति स्थिरे पि धर्मे चोदनाप्रमितत्वस्य संभवान्नाव्याप्तिरित्यर्थः। एवं विशेषं व्याख्या

यस्तत्रं व्याकुर्वंति। चोदनात्वित्यादि। अत्र पुनः शाब्दस्त्वर्थो विशेषमवधारयंति। चोदनातु प्रथमतः प्र-
वृत्तिजनकत्वादारंभ इत्यर्थः। करणेषूत्कृष्टं चोदनालक्षणत्वेन धर्मस्य विहितत्वेपि चोदनास्वरूपस्यानु-
क्तत्वान्न दिदानीमुक्तं। नन्वारब्धतत्वा विशेषपि लिङर्थे कुतोयं विशेष इत्यत आहुः। लिङर्थ इत्यादि। यथा
आख्यातानां भावनालक्षणः क्रियारूपोर्थो व्यापारो विधेयस्तथा लिङोभिधालक्षणः। अंगैः कर्मभावप्र-
त्वकर्मणा फलं भावयेदिति पूर्वापरीभावापन्नः शाब्दव्यापारो विधेयः। तादृशेन शाब्दव्यापारेण पुरुषः क-
र्मणि प्रवर्त्तत इति तस्य पुरुषप्रेरणासंबंधः। न चात्र मानाभावः घटमानयेत्यादिशाब्दश्रवणानंतरमावि-
न्यां वृत्तावस्यं मां प्रवर्त्तयतीति प्रतीतेस्तदनुरोधेन वेदेपि तथा कल्प्यते। ननु वेदे तथ्येति कथमवगंतु शक्य-
त इत्याकांक्षायां तदनुसारयंति। त्रैधेत्यादि। एतेन फलकामनाया अर्थवादानां च न सर्वत्रोपयोग इति बो-
धितं। इदं च अग्निहोत्रं जुहोतीत्यादिभिः कामपदार्थवादरहितैः केवलकर्मबोधकवाक्यैरवसीयते। न च का-
मनाभावे फलाभावः शंक्यः। एतान्यपि तु कर्माणीत्यादिभिः स्मृतिवाक्यैस्तस्य तादृशफलनिश्चयात्। नन्वेवं

१४ सत्येषएवसाधुकर्मकारयतीतिश्रुत्युक्तंईश्वरस्यैवप्रवर्त्तकत्वंकुतोनाद्रियतइत्यतआहुःईश्वरइत्या
दितश्चालौकिकानांहष्टएवविश्वासाज्जैमिनेश्चतादृशमेवयथाकथंचिद्वेदसम्मुखीकरणार्थंप्रवृत्त
त्वात्तदनादरइत्यर्थः।एवमन्यत्रापिबोध्यं।यदिजैमिनेरयमाशयोनस्यात्तदोपासनासूत्रेषुजैमिनाये
वमेधपर्वणिचब्रह्मसमाहारस्यचकिमितिवदेत्।अतोयइतोऽन्यथानिरूपयंतितेस्वभ्रांतिंजैमिनावारोपयं
तीतिदिक्॥सिद्धमाहुः।एवमित्यादि।तेभेदंसिध्यति।सिद्धवस्थापन्नधात्वर्थरूपक्रियात्मकोधर्मउदासी
नोनामपदेभ्यःप्रतीयते।साध्यावस्थापन्नधात्वर्थक्रियात्मकःपुरुषापेक्षःपुरुषार्थरूपश्चाख्यातपदे
भ्यः।तत्रापिलिङःशानारसतया।अतःपुरुषार्थतयातदारम्भतयाचप्रतीतिजननादाख्यातपदानिप्र
मितिजननेमुख्यानिनामपदानितुसिद्धतद्बोधकतयातदुपकारकाणीतिनिष्कर्षः॥ अन्येत्वधिकर
णद्वयमत्रकल्पयंति।तत्रप्रथमेखिलमहत्त्वार्थंवि।धिवाक्यमुदाहरणं।तत्रकिंसर्वैःपदैरपूर्वंप्रतिपा १४
द्यतउतैकेनवा।यदाप्येकेनतदापिकिंद्रव्यादिवाचिना।भावनवाचिनावेतिसंदेहः।एकेनभावनावाचिने

तिसिद्धांतः॰द्वितीयेतुअपूर्वसद्भावेसंशयः।यागस्यक्रियारूपत्वेनत्रिक्षणावस्थायितयाका-
लांतरभाविफलजननासामर्थ्यान्मध्येव्यापाररूपद्वारंकल्पतेऽतोऽस्तीतिसिद्धांतः।तदिदंसूत्रविरुद्धं।
सूत्रेऽपूर्ववाचकपदाभावात्।आख्यातानांक्रियासामान्यवाचितयासमानपदोपात्तस्यधातोश्चातो-
ऽपितद्विशेषवाचितयातन्निष्ठस्यकरणत्वस्यदेवताप्रीतिरूपव्यापारेणसिद्ध्यनुपपत्त्यभावात्॰सा
धकतमंकरणमितिकरणलक्षणांगीकारेतुव्यापारापेक्षैवनास्ति॰स्वरूपेणैवनिर्वाहात्।आख्यातपदेस्तत्
कल्पनस्याशक्यत्वात्।पुरुषप्रयत्नस्तुयागादिव्यंजकतयातदेकदेशत्वमेवनतुयागादिनिरूपत्वं।यथा
उद्यमननिपतनपुरुषरूपव्यापारसहकृतेनपरशुनाआघातात्मकद्वैधसंयोगद्वाराछिदासाध्यते॥त
थाचोदनाप्रयुक्तपुरुषव्यापारान्निष्पन्नेनयागेनदेवताप्रीतिद्वाराफलंसाध्यते॰दृष्टांतेफलस्यसाध्यत्वं
दार्ष्टांतिकेप्राप्यत्वमित्येतावान्विशेषः।अतःस्तेनापितत्कल्पनायाअशक्यत्वात्॥५॥ ॥तानिद्वैधंगुण
प्रधानभूतानि॥ ॥अधिकरणमवतारयंति।तानीत्यादिव्रीहीनवहंतीतितंडुलान्पिनष्टीत्यादिनिर्दिष्टा

१५ नित्यानि कर्माणि तान्यपि अग्निहोत्रादिवत्फलसाधकानि चिदेवेत्याशंक्य विधेयत्वेन चोदनाविषयत्व(
स्यतेष्वपि तुल्यत्वात्सर्वाण्येवं तत्स्थेति सर्वपक्षे तदभावाय विभजतीत्यर्थः। त्रिसूत्रमिदमधिकरणं। तत्र द्वि
तीयसूत्रमवतारयति। तत्तेत्यादि। ।यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात्॥ ॥
सूत्रं व्याचिकीर्षतः प्रधानाप्रधानविभागे हेतुं बोधयितुमाहुः। प्रधानमित्यादि। श्रुते फले तत एव तस्मि
न्कामनोत्पद्यते। नेतरस्मादितीतयाभ्युक्तेच्छानिरुपाधीध्वा· तस्याविषयः फलमेव। साधनं तु तदुपा
यत्वेनाऽन्यानि तत्पायोपायत्वेनेतीच्छाविशेषविषयत्वमेव विभागे हेतुरित्यर्थः। व्याकुर्वंति। यैरित्या(
दि। संस्कर्तुमिति। द्रव्यं संस्कर्तुं हेतुमवतारयति। नन्वित्यादि। द्रव्यस्य गुणभूतत्वं साधयति। द्रव्यमित्यादि।
॥ ।तृतीयमवतारयति। गुणेत्यादि। ।यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात्॥ ॥ १५
एकवचनं प्राधान्यबोधनायेति। गुण इति। तस्येति चैकवचनं द्रव्यस्य प्राधान्यबोधनायेत्यर्थः। वस्तुतस्तु
प्राधान्यबोधनायेति पाठः प्रतिभाति। विचारप्रयोजनमाहुः। अस्येत्यादि। प्रैयंगववचनादिति। प्रैयंगवं(

चरुं निर्वपेदिति वचनात्॥ तत्रापि चरुनिष्पत्यर्थं व्रीहियवेतु यावत्प्रयोजनमिति ....
प्रयोजनं तु यागस्वरूपाभिव्यक्तिः अवघातनिष्पन्नैर्द्रव्येण यागो निष्पद्यते नान्यथेति बोध्यं ॥
न्नमपि विशेषमाह ॥ अथेत्यादि ॥ तथा चोक्तरीत्यैव प्रधानाप्रधानविभागेन त्वंगांगित्वेनेत्यर्थः ॥ २ ॥
॥ ॥ धर्ममात्रेतुकर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ॥ चतुःसूत्रमिदमधिकरणं ॥ तत्र विषयादिकमाह ॥ स्रुव ..
मित्यादि ॥ पूर्वपक्षमाहेति ॥ पूर्वसूत्रेणाह ॥ धर्ममात्र इति ॥ विहितक्रियामात्रकरणे पूर्वप्रामाण्ये निषे
धक इति गुणकर्मत्वनिषेधकः ॥ स्फुटमन्यत् ॥ तुल्यश्रुतत्वादेतरैः सधर्मः स्यात् ॥ ॥ द्रव्योपदेश इति
चेत् ॥ ॥ एतत्सूत्रद्वयमनाधेयंतु प्रकटार्थं ॥ ॥ न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥ ॥ एनामिति ॥ प
रिधीनञ्जनक्तं दायेति ॥ अग्नौ तदुपातायः ऋति लिखनेन संमार्गादीनां यागस्वरूपोपकारित्वं स्फुटीकृ
तं आर्थं वादिकं च फलमंगीकृतं शेषं स्फुटं ॥ ४ ॥ ॥ स्तुतशस्त्रयोः संस्कारो याज्यावद्देवताभिधानत्वात्
॥ ॥ सप्तदशसूत्रमिदमधिकरणं ॥ तत्प्रयोजनमाह ॥ द्रव्येत्यादि ॥ विषयमाह ॥ आज्यैरित्यादि ॥ दंशो

तिष्टोमे श्रूयते। आदिपदं मन्त्रेषामपि संग्राहकं। तेन सर्वाणि स्तोत्राणि शस्त्राणि चात्रोदाहरणं। तत्र प्र
गीतमन्त्रसाध्या स्तुतिः स्तुतं स्तोत्रमित्युच्यते। अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रमिति। तत्राज्यपृष्ठशब्दौ
स्तोत्रविशेषनामनी। प्रउगनिष्केवल्यशब्दौ शस्त्रविशेषनामनी। संदेहमाह। तत्र स्तोत्रादि देवतासंस्का
रार्थं गुणकर्माणि उत प्रधानकर्माणीति। पूर्वपक्ष इति। सूत्रोक्तः पूर्वपक्षः न क्रियेत इति। सम्मार्गाव
घाताभ्यामिव न क्रियते। अत इति गुणानां देवताप्रकाशार्थतया आज्यावेक्षणाभ्यामिवात्रापि देवतायाग
वसुरभत्वात्। तथा च स्तुतशस्त्रे गुणकर्मणी इत्यर्थः॥ ॥अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य
गुणभूतत्वात्॥ ॥आकुर्वंति तु शब्द इत्यादि। सर्वाधिकरणे धर्ममात्रे तु कर्म स्यादिति सूत्रे तु शब्दः पू
र्वपक्षसिद्धांतवारकत्वेन दृष्टः। इहापि तथेति संदेहो मा न? इत्यत आह। देवतासंस्कारपक्षमिति
। तथा चायमर्थः स्तुतशस्त्रे यदि मन्त्रोक्तदेवतासंस्कारः स्यात्। तदा नदतिरिक्तदेवतानामधेयेनापकृ
ष्येत। यस्मादन्यार्थेपकृष्यते तस्मान्न देवतासंस्कार इति। अपकर्षो वधयनं। तदेतदनुपादयंति। यत्र

९६

त्यादि।यत्रस्तोत्रमंत्रेदेवतातत्रइंद्रस्यनुवीर्याणीतींद्रस्यनामपंचदशंचपंचदशःस्तोमयुक्तंस्तो
त्रं।तदपींद्रस्यैवगमकं।इंद्रेणदेवेनपृतनाजयामित्रैष्टुभेनछंदसापंचदशेनस्तोमेनेतिविष्णुक्रम
मंत्रेदर्शनात्।एतेषुमहेंद्रस्यनामापिनश्रूयते।गीयतेचमहेंद्रग्रहयाजिसंनिधौ।संस्कारपक्षेतु।
तत्रनापकृष्येत।तथाऽन्यत्रापिस्तोत्रग्रहदेवदैवत्यस्तत्यतइतिननियमः।तथापिचेत्संस्कारनिर्बं
धः।क्रियते।तदैंद्रग्रहयाजिस्थलएवापकृष्येत।तदुन्नयमपिविरुद्धं।अत्रआशंकते।नन्वित्यादिमा
यं।निष्क्रमाणकोनिर्बंधोपितुदेवतालिंगात्।लिंगंचप्रधानपक्षेपितुल्यं।शिष्टाचारस्तुनलिंगापे
क्षयाप्रबलइतितत्राप्यपकर्षःप्राप्नोतीत्यर्थः।समाधायैकंहेतुंव्याकुर्वति।चोदनार्थइत्यादि।अत्र।
हिस्तौतिशंसतिपदोक्तास्तुतिश्चोदनार्थइतिप्रधानं।देवतातुतदनावाकृगुणभूता।अतोलिंगस्यगु
णभूतत्वात्तेनैंद्रग्रहेतदपकर्षोनयुक्तइतिचोदनार्थानुगृहीतत्वाच्छिष्टाचारेणनिर्बलइत्यर्थः।।अनु
न्नयोर्गुणप्रधानंभावमभ्युपेत्यसन्निधेत्वायदृष्टांतमाह।यथेत्यादि।अत्रह्युपस्थानंचोदनार्थः।।उ

पस्थानं नाम समीपे स्थित्वा स्तवनं तत्ताभ्यां तोऽद्वितीयां तस्थ्वत स्माद्भिन्नः। यदि संज्ञिनोऽर्थः प्रधानं स्यात् त
दा अस्यार्थे पर्वाग्नेरुपस्थानं स्तुतिर्न वदेत्। तथा च लिंगबाधादैंद्रगृहस्थलस्तुत शस्त्रापकर्षेण युक्तः
निष्कैवल्यं तु संमतीति। शस्त्रचोदनार्थत्वात् प्रधानं सदेवतारूपोऽर्थो गुणभूत इति चोदनानुरोधेन सोऽप
कृष्यते। अतः स्तुतशस्त्राभ्यां न देवतासंस्कार इत्यर्थः॥ ॥वशावद्वा गुणार्थत्वात्॥ ॥सूत्रमवतारयति
पुनः शंकत इति। पूर्वोक्तसंस्कारत्वमाहेंद्रं गृहपतिस्थलेऽपींद्रस्तुत्यपकर्षो नोपपद्यत इति। तदयुक्तं। (
यतः इंद्र एव महेंद्र इति। महत्त्वगुणः यथा राजैव ब्राह्मणः एवं महत्त्वगुणः योगेन महाराजो महाब्राह्म
ण इति। तथा चैंद्रमहेंद्रयोरैक्यात्तत्रेंद्रस्तुत्याकर्षेपि न संस्कारत्वहानिरित्यर्थः। किंचिदाशंक्य परि
हरति। तहींत्यादिः इतिपरा इति। एतद्वाक्यविहिते वशालंभके यागे वशा। अंधः प्रा निगद इति। पर
प्रत्याय्यनार्थो मंत्रः। देवता गृह्यत इति। तथा च देवतायै वशा गुणभूता स्यादित्यर्थः। शेषं स्फुटं॥ ॥न श्रुति ९
समवायित्वात्॥ ॥सूत्रमवतारयन्व्याकुर्वन्ति। परिहरति। नैतदिति। श्रुतिसमवायित्वादिति। अतो सम

मुबाधयोक्तिसमवायीतस्य नावस्तत्वं तस्मात्। तद्युमादयंति। ग्रनुनावित्यादि। तद्धितांतं महेंद्रपद।
माहेंद्र इति। तत्र महत्त्वं नक्तरो गुणो देवतायां समवेतः प्रतीयते। तेन गुणेन युक्त इंद्रो वा ग्रहादौ दे
वतात्वेन प्रतीयते। सगुणो वा इंद्रो वा। किं कस्मा स्पृथक्कृत्य न शक्यते। सन्नियोगशिष्टो मो महद्द्वे।
ति सह वा निर्दिष्टिरिति न्यायात्। संन्नियोगशिष्टत्वमात्रं तु महेंद्रपदादेवतातद्धितः। न चेंद्रपदादे
वतद्धितस्ततो महत्पदेन समास इति वाच्यं। नहींद्रशब्दात्तद्धितः। तथा सति माहेंद्र इति स्यात्। ग्रहादे
महत्वस्याभावेनासमर्थत्वाच्च महत्परमोत्कृष्टः स्तूयमानः परिस्पन्देन विहितः समासश्च नत्र वेतान्
न समासांतरमत्र संभवति। आन्महतः समानाधिकरणजातीययोरिति लत्वे गसमानाधिकर
णस्योत्तरपदत्वे महत आदंतत्वविधानात्। अतः शाकृत्सेटादिं इंद्रा महेंद्रो नित्यं समर्थो गा। ।अथ पदेन्या
ख्यातो नाधिकाम इत्यादि। अयमर्थः। इतः पूर्वं नागतः श्रीमहेंद्रयज्ञे तस्यादिनागतस्त्रीकाणामेव महें
द्रयागमनुक्तांतदतिक्रमेणेंद्रयागे स्वदेवतातः प्रस्तुमादेवतांतरस्याप्रसापापित्वं चोक्तात तदनंतरं

९८ प्रामश्राकस्यसर्वदेवेंद्रया सोसंवत्सरोन्तरंव्रतयतीणिकृत्वाइंद्रवामहेंद्रस्यपेठंयत्नेतेस्तुक्तं।इंद्रमहेंद्र
योरैक्यइदंनोपपद्यतइति॥ ।गुणस्यानर्थकस्मात्।नाध्यमत्रस्फुटार्थं॥ ॥तथायाज्यापुरोरुचोः॥
अत्रपुरोरुक्पदेनपुरोनुवाक्योच्यते·पुरःपूर्वंच्यतइतिपुरोरुक्कस्मात्हियाज्यातःपूर्वमुच्यते·पुरोनुवा
क्यामनूच्ययाज्ययाजुहोतिश्रुतेः।अनर्थकइत्यादि।याज्यानुवाक्ययोरिंद्रइतिमहेंद्रइतिचयःशब्द
भेदःसोनर्थकःस्यादित्यर्थः।तदाहुः इंद्रेत्यादि।एवंचतुर्भिर्युक्त्योभेदउक्तः॥ ।वर्जाययामर्थसमवा
यात्॥ ।सूत्रमवतारयंति।नन्वित्यादि।नापीत्यादि·व्यक्तिःसंज्ञावेपितदपदामादीनामत्रजातिरि
त्यर्थः।नचदेवताविग्रहवादेव्यक्तेरैक्यात्तयोरैकंपंशंक्यं·तदापिब्रह्माविज्ञानाविज्ञात्मनाभेदसिद्धेरिति
तथावदृष्टानवैषम्यादसंगतःपूर्वपक्षइतिभावः॥ ।एवमिंद्रमहेंद्रयोर्भेदेसाधितेवर्जादृष्टांतेपु ९८
नःप्रकारांतरेणशंकते॥ ।यत्रेतिवार्थवत्त्वात्स्मात्॥ ।तच्चाकुर्वंति।वेत्यादि।ननुक्रमसंस्कारकर्म
त्वेस्तुतत्रास्त्वयोरन्यत्रापकर्षोनस्यादिति।तत्राह।अर्थवशात्।महेंद्रग्रहयजिमन्निधौस्तुतशस्त्रेच

द्दितइतितदर्थवत्त्वा।तत्रतयोरपकर्षेणसंस्कारकर्मत्वबाधकः।तदुपपादयंति।यत्रेत्यादि।तथाचात्र
श्रुतिसाधारण्यात्प्रथमेपिन्नायमानःसोंद्रस्यपरमैश्वर्यरूपोर्थोनत्यज्यतइत्यदोषात्मृपनंस्यात्।त्रोपं
स्फुटं।एवंतात्पर्यमुपपाद्यसौत्राणांपदानामर्थमाहुः।।इतित्राह्मद्इत्यादि।। ।।नचाम्नातेषु।। ।यच्छेत्या
दि।सर्पिराज्ञियाकृग्निरिति।तत्रमिन्नेमन्त्रयाद्याहुचोमिसंबंधिन्यःसर्पराज्ञियाइत्युच्यंते।सर्पराज्ञियाइ
त्यत्रमिसोप्तुकछंदसः।मनोग्रहेइति।द्वादशाहस्ययागस्यदशमेहनिमनोग्रहोविहितस्तत्र।तेनसि
द्धमाहुः।तस्मादित्यादि।संस्कारत्वेसिद्धइति।तत्परत्वेनसंस्कारत्वेनसंस्कारत्वेसिद्धे।अग्निमसत्रमव
तारयंति।नचेत्यादि।। ।दृश्यते।। ।त्राण्यंप्रकटार्थं।अपिवाश्रुतिसंयोगात्प्रकरणेस्तौतिशंसतीतिक्रियोत्प
त्तिंविदध्यातां।।। ।इतत्रारम्यषट्सूत्राणिसिद्धांतसाधकानीतिव्याकुर्वंति।अपिचेत्यादि।संयोगइत्ति।
अनुपयुक्तार्थकत्वाख्यसंयोगः।वाक्यइति।प्रथमाद्विवचनं।नेति।संस्कार्ययोर्देवतायाएवप्राधान्येन
तस्याएवप्रकरणीत्वान्नतादृत्यमिति।अनुपयुक्तत्वाख्यकर्मसंपादितं।स्तोत्रांतराण्यवतारयंति।हेत्वं

१९ तरमाहेति॥ शब्दपृथक्त्वाच्च॥ ॥कः शब्दः संस्कारास्तुतिशब्दयोर्भेदक इत्यत आहुः॥ द्वादशकपालादिः स्तोत्राणीति
शेषः स्तुत्या देवता कथंचन संस्कार्याः। तत्र संस्कारकसंख्यानिष्पन्नयोजनाश्रुतत्स्थेष्टार्थः। आवर्तत इति।
पंचदशसंख्या आवर्त्तते शेषस्फुटं॥ ॥अनर्थकं च तद्वचनं॥ ॥तथेंद्रस्तुतिरिति। यथा आग्नेय्यपदेन प्रधा
न तदेवतायाः प्राप्यादेवतांतरनिषेधादाग्नेयीवचनवैयर्थ्यं तथा माहेंद्रपदेनैव देवतांतरनिषेधादैंद्रस्तु
तिरपि वैयर्थ्यं स्यादित्यर्थः॥ ॥अन्यश्चार्थः प्रतीयते॥ ॥अभिधानं च कर्मवत्॥ ॥फलनिर्वृत्तिश्च॥ ॥एतत्सूत्रत्रयेण ना
स्यपक्षतार्थे॥ ध॥ ॥विधिमंत्रयोरैकार्थ्यमैकशब्द्यात्॥ ॥प्रासंगिकमिदमधिकरणं॥ अत्र विषयवाक्य
मुदाहरन्त्याकुर्वीति कर्मफलस्य प्रत्यक्षत्वबोधनायायत्त्विरस्यादि। इष्टं तेगोवाष्टवाख्याः किरणाः अभ्येते
यजे इति। देवानां पानसंपादनेन यज्ञते। एतस्मात्पूर्वपक्षसूत्रत्वज्ञापनायाहुः। विधायके इति। ऐकार्थ्यं
॥ एकप्रयोजनकत्वं। तथा च ददाति यजत इति धात्वाविख्यातान्याग्रहस्याभ्यासात्कर्मत्रेदंगीकार्ये इति पू १९
र्वपक्षाशयः॥ ॥अपि वा प्रयोगसामर्थ्यान्मंत्रोऽभिधानवाची स्यात्॥ ॥अभिधानवाचीति। अभिधीयते

नेनेत्यभिधानं धर्मवाचकं पदं तद्वाचीतरदभिधायक इत्यर्थः ॥५॥ ॥तत्त्वोदकेषु मंत्राख्या॥ ॥सर्वे पदक्रमु-
खेनैव संदेहमपि सूचयतः सूत्रमवतारयंति। नन्वित्यादि। व्याकुर्वंति। यस्येत्यादि। अत्रातिव्याप्तिमाशं-
क्य परिहरंति। यद्यपीत्यादि। यद्यप्यध्ययनसर्वमेवोच्चारणं प्रेरितं तथाप्याच्छित्ताद्यावपि सर्ववेदा-
ध्ययनं। विहितमतो। विधिबोधितोच्चारणं प्रेरितं तथाप्याच्छित्तादावैष्टिकः ग्राष्टो मंत्र इति लक्षणमत्रा-
गञ्जागत्ति आप्नोति। तथापि कर्मविधिना विविधमनुष्ठानं यत्र बोध्यते तत्र मंत्रः साधनत्वेन बोध्यते न-
नेनेदं कुर्यादिति। अतोग्रेऽपि कर्मण्युच्चारणविधेरध्ययनानुवादकत्वात्तद्बोधनं चोदकमतिदेशकमेवे-
त्यर्थः। तेन न सिद्धमाकृतः। अत इत्यादि। न च प्रत्यगाशीर्मंत्रादिष्वव्याप्तिः। विषयत्वेन रूपेणैतेषामपि त-
प साधनत्वात्। न च प्रत्यगाशिषो मंत्रा न जपस्य करणानीति कल्पसूत्राविरोधः। तत्राकरणानित्यनेन
न करत्वाभावस्यैवोक्ततया साधनत्वस्यावारणात्। ज्ञानेइव जपेऽपि विषयस्य कर्मत्वकारणत्वयोर
विरुद्धत्वादिति। सिद्धमाकृतः। कर्मकरण इति। कर्मणः करणं येन स इत्यर्थः। एवमुत्तरकांडस्थेष्वपि मंत्रे-

२० रूपासनासाधनत्वमितिनकोपिदोषः॥६॥ ॥त्रैवेद्याब्राह्मणत्वाद्धः॥ ॥आम्नायमत्रातिरोहितार्थः॥७॥ ॥अ
नाम्नातेषुमंत्रत्वनाम्नातेषुहिविभागः॥ ॥लौकिकवाक्यानामिति। केचनेत्यादि। तत्रास्वरसंबोधयंति।
तद्दित्यादि। क्रमरपाठकृतेन मंत्रवतीत्यतआह। वाजसनेयिक इत्यादिना मंत्राविति। इदं एतस्मिंमंच।
ग्नीषोमायककृतविंकानितितमंत्रौ। ननुमंत्रमध्येपठितयोः कृतोनमंत्रत्वमतआह। अमंत्रेत्यादि। यजु
ष्ट्वार्थमिति। यजुर्वेदत्वार्था। तद्बोधनाययजुर्वेदग्रहणमाह। मंत्रेत्यादि। इदंचचरणव्यूहेसिद्धं। त्रि
गुणंपठ्यतेयत्रमंत्रब्राह्मणयोः सहयजुर्वेदः सविज्ञेयः शेषाः शाखांतराः स्मृताइतितत्रवाक्यात्॥
त्रिपथमिति। पाठेतु। पदक्रमजटात्मकानांत्रयाणांसमाहारस्त्रिपथंतेनप्रकारेणपाठस्त्रिपथपाठ
स्तदर्थः। ब्राह्मणभागेहिनपदादिपाठः। किंतुसंहितायामेव। तत्रचमाध्यंदिनानांचतुर्विंशोध्यायेव
संतायकपिंजलानित्यादीनिबहूनिवाक्यानि। तानिचेद्ब्राह्मणेपठ्येरंस्तदातेषांपदादिपाठेनस्यात्।
अतोमंत्रभागेसंहितायांपठितानितावतानमंत्रत्वंनियंतुंशक्यतइत्यर्थः। सिद्धमाह। तस्मादित्यादि। २०

वसंतायेत्यादीनां मंत्रत्वांगीकारे तूक्तवाक्यबाधापातात्। अत्रोक्तं आम्नातत्वे सति विशेषविधिबोधितो ब्रा
ह्मणकः शाखायां मंत्र इति बोधितं लक्षणं युक्तं॥ किंच। एतदतिरिक्तस्थले कुत्रापि विधायकत्वं न मंत्रे दृष्टं। अत्र च
मंत्रत्वं संदिग्धं। ब्राह्मणे तु विधायकत्वं प्रसिद्धमिति लिंगं न तु। लिंगस्थानाकृतिरेवं। अतस्तथेत्यर्थः॥ २॥
॥ ॥तेषामृग्यत्रार्थवशेन पादव्यवस्था॥ ॥अत्र तेषामित्यस्य आम्नातानां मंत्राणामित्यर्थः। नन्वेवं स
ति छंदःसौ वैयर्थ्यादंगत्वहानिप्रसंग इत्यत आहुः। अनुवाद इत्यादि। अयं जैमिन्युक्तपादव्यवस्थाक
ल्पनात्मकः छंदःशास्त्रानुवाद एव। तत्र मगणादिकृतपादव्यवस्थानां लौकिकानां छंदसां वेदत्वाभावात्।
तत्र तेऽप्यलौकिकमिति सूत्रे तेषां प्रासिद्धिकं कथनं प्रतिज्ञाय मगणादिभिस्तद्व्यवस्थादर्शनात्। ततः
सर्वेऽकथितेष्वपि तान्विनैव बाह्यैः व्यवस्थादर्शनाच्च। तत्र गायत्र्यादीनां नानाविधत्वस्य नानाविधपादक
ल्पस्य च कथनेन केयं गायत्र्यादिनिर्णयस्यार्थबलादेव सिद्धेरिति तत एवावगम्यते। यदि पुनस्ता
दृशामपि छंदसां वेदत्वमुच्यते। तदा वाक्यभेदः। लौकिकेषु तेषु छंदस्त्ववैदिकत्वयोर्विधानादिति भा

२१ वः॥८॥ ॥गीतिषु सामाख्या॥ ॥छांदोग्योपनिषद्युपासनायां सा चामश्चेति विगृह्य समस्तं सामपदं बु
द्ध्या व्याख्यातमिति पूर्वस्मिन्नप्यामदेन सह समस्य व्याख्यायते। मेत्यादि। संकेताभावादिति। आमेत्यादे
संकेताभावात्। ज्ञापनप्रयोजनमाह। कथमित्यादि। साम्नो रसवत्त्वं च गांधर्ववेदप्रसिद्धत्वादवगं
तव्यं। ऋक्सामयोरेकार्थबोधने पौनरुक्त्यमाशंक्य परिहरति। अपौनरुक्त्यमित्यादि॥९॥ ॥शे
षे यजुःशब्दः॥ ॥अननुष्ठानेर्लघुत्वादिति। शेषपदेन ऋक्सामभेदे बोधनीये तयोरनुष्ठेये तदुप
यलक्षणानुसंधानाधीनमेतज्ज्ञानमिति प्रतिगौरवं। स्वतंत्रलक्षणे तु तदभावाल्लघुत्वं तस्मात् ऋग्यो
गोदाहरणमाह। एतदित्यादि। इदं हि स्वाध्यायब्राह्मणेऽमिति प्रतिपद्यत इति श्रवणेनोपक्रमं
विधाय तत्संशयार्थमुक्तं। अयं यजुर्मंत्रस्य या विद्यादिति निधिरूप इति तदर्थः। द्वितीयं तु संहिता
यां षष्ठाष्टके। तत्र हि अभिजित्यं देवं सवितारमित्यतिछंदसर्चा मिमात इत्युक्त्वा पुनः पंचदशत्वे यजुषामिमा २१
त इति तेनैव मंत्रेणोन्मानसंख्या विधत्ते इति। अतस्तस्यामर्थवशेन पादव्यवस्थया ऋग्लक्षणसद्भावेऽपि पा

द्विशेषविवक्षाभावाद्यजुःप्रयोगः। यथा चैकाक्षरे प्रणवे पादादिसंज्ञाभावेनाम्नात्येपि यजुःप्र-
प्रयोग इत्येवं ज्ञापनायैवमुक्तं। किं चायं शेषशब्दप्रयोगो यजुर्मंत्राणां नेदत्र्यमिति ज्ञापयति। विशे-
षविवक्षाभावेऽन्यत्रापि यजुष्ट्वस्य सुपरत्वादिति। तेनाक्षरात्मकमंत्रविधानेपि यजुषेति प्रयोगो यथा
भवति पंचभिराहवनीयमिति। आधाने ब्राह्मणे। त्रिभिरक्षरैर्गार्हपत्यमादधातीत्यनेन भूर्भुवःसुवा-
रिति पंचानामक्षराणां विनियोग उक्तः। यजुःशब्दश्च दृश्यते। नेनेति श्रुत्यस्यासिद्धः। अतोऽक्षराणाम-
पि यजुष्ट्वं यथा भवति तदर्थमेवमुक्तमित्यर्थः। अनित्यमिति मंत्रस्तु प्रथमाष्टकद्वितीयप्रपाठ-
केऽयं स्तुनातेऽयं स्तुः प्रच्युतामित्यस्मिन्ब्राह्मणे तु वाकेऽष्टव्यः। एवं च देवो वः सवितोत्पुनात्वच्छिद्रे-
ण पवित्रेण वसोः सूर्यस्य रश्मिभिरित्यस्य मंत्रस्य यजुर्मध्यपाठेप्येतद्ब्राह्मणे सावित्र्यर्चेति विशेषनि-
र्देशात् गायत्रीलक्षणस्यैतत्र सत्वाच्च ऋक्त्वमपि निर्बाधं। एवमन्यत्रापि द्रष्टव्यं॥ ९॥ ॥निगदो वा च-
तुर्थं स्यात्कर्मविशेषात्॥ ॥ एवं त्रैक्तरूपेणेदमारभ्यत इत्याशंक्याह। त्रिविधा इत्यादि। परप्रत्यायनार-

२२ ये मंत्रा निगदाः प्रोक्षणीरासादय· इध्माबर्हिरुपसादय· इंद्र आगच्छ· हरिव आगच्छेत्यादयः ते किं य
जुर्भ्यो ऽन्ये किं वा यजुष्ष्वेवेति संदेहे सर्वं पक्षमाहेत्यर्थः॥ अतिरिक्त इति विरुद्धः नतु निवेदो निगदादपि
विलक्षणो॥ यन्निविड्भिर्न्यवेदयंस्तन्निविदां निवित्त्वमिति निर्वचनविनियोगयोर्भेदादतः स्यात्कुतो
न विचारिता इत्यत आह॥ निविदामित्यादि· तथा च तासां निर्वचनादिभेदे सत्यपि निगदवद्यजुर्विरुद्ध
स्य धर्मस्याम्नाततत्त्वेन यजुष्ट्वशंकाभावात्ता न विचारित इत्यर्थः॥ भेदव्यपदेशाच्च॥ निगदो व्यपदेशा इति
भिन्नासंज्ञा॥ अप्रयोजकमिति· यजुष्ट्वाप्रयोजकं॥ एवं द्वाभ्यां पूर्वपक्षे कृते चतुर्भिः सिद्धांतमाह॥॥
॥ यजूंषि वा तद्रूपत्वात्॥ ॥ नहीत्यादि॥ पदव्यवस्थागीत्योरभावेन सिद्धे शेषत्वाद्यजुष्ट्वे अतिरिक्तध
र्मविशेषेण धर्मिणां भिन्नतेत्यर्थः॥ ॥ वचनाद्धर्मविशेषः॥ ॥ एतावतेत्यादि॥ उपांशुत्वस्य यजुरंत
रे सावकाशतया निगदाख्ययजुः युवचनस्य नियामकता कल्पनमात्रेणोच्चैष्ट्व धर्मसार्थकेसतिते २२
न धर्मिभेदकल्पनायां गौरवमित्यर्थः॥ अर्थाच्च॥ ॥ अर्थादिति· प्रयोजनात्॥ एवं देवस्फुरा कुर्वंति॥

नहीत्यादि सर्वोक्तहेतोः भावत्वायाऽऽहः प्रायिकमित्यादि। एतदुद्देशे निगदानां प्रायिकं त्वपां स्वपरसाधा-
रंतीत्यतस्तत्र तदभावादिति। एवं सतीसूत्रवैयर्थ्यमतपरं तत्र माऽऽहः स्वाभाविक इत्यादि। अयं तदुद्देशधर्म-
मंत्राणां स्वाभाविकः मंत्रास्तु कर्माङ्गभूताः अतस्तथेत्यर्थः॥ ॥गुणार्थोऽपदेशः॥ ॥धर्मविशेषादि त्वस्यो-
त्तरमुक्ता नेदं व्यपदेशस्योत्तरं स्यादतीत्याऽऽहः। निगद इत्यादि। अत्राशंकते। नन्वित्यादि। वचनप्रयोजनमं-
ज्ञानेदेरुद्देशे गुणकथनं व्यर्थं। तदन्यतमेनैवोद्देशस्य प्राप्तेः अतो वचनं प्रयोजनं वेति द्वयं गुणानेदक-
मस्तु। निगद इति व्यपदेशस्य तु न तादर्थ्यं। ताभ्यामेव तत्प्राप्तेः समस्य वैयर्थ्येन तत्रापर्यवसाना तत्राह-
तोऽर्थतो विधानाच्च तत्र गुणत्वं तत्रापेक्षायाः अनावात् यदि गुणस्य नित्यत्वार्थं संज्ञायि गुणार्थे स्तुमतो। त-
दा सतदुद्देश गुणस्तत्र नित्यत्वइति सर्ववैलक्षण्याऽऽहः गुणः स्वरूपभेदक एवास्तु। तथाच संज्ञायां गुणार्थत्वात् त-
रस्यापि न स्वरूपभेदबाध इत्यर्थः। अत्र समादधते। मैवमित्यादि। तदभावादिति। उद्देशस्य तत्राभावेन त-
स्य नित्यत्वाभावात्। तत्प्रकारमाऽऽहः। यत्रापीत्यादि॥ ॥सर्वेषामिति चेत्॥ ॥नाथमत्रस्फुटं॥ ॥नत्वप-

२३ देशात्॥ ।तेनेति। रूढेन व्यपदेशो नाम न चक्रम्यत इति साचामवेतियोगस्य तत्रापि सत्वादस्य तत्पर्याय
त्वशंक्यं। अपादबद्धत्वाम वर्णरहितो निगदो तोन तत्पर्यायत्वं। अयं पादबंधए वक्रक्वामयोर्यजु
षः सकाशाद्भेदको तस्तथ्येत्यर्थः। अत्रे वसस्त्रकारसाग्रहे अहेबुध्निये तिमंत्रोक्तं त्रैविध्यमेव बीज
ज्ञातव्यं॥ १२॥ ॥अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्॥ ॥एवं चतुर्भिरधिकर
णैर्मंत्रत्रैविध्ये स्थिते सोऽपि त्रेधा बोकथितो वक्ष्यते तदर्थमधिकरणांतरं न इत्याह। संक्षिप्ते त्यादि॥
ज्ञायत इति। मंत्रेयत्ताज्ञायते। एवं चेत्तरानुषंगयुक्तेष्विति। अनुषंगो नाम एकवाक्यशेषतयासं
निहितस्य पदादेर्वाक्यांतरशेषतया योजनं। एवं वाश्याद् तादृशपदांतरादियुक्तेषु। सत्रस्य प्रय
मंद लं व्याकुर्वंति। एकार्थेत्यादि। तत्र अर्थैत्ति धेयरैवस्तु प्रयोजनानि इत्निक्षिति कोशेनार्थस्य त्रा ह्
स्यं च वस्तु शक्त हे पिरैवस्तु निरूत्तिनामत्र प्रसंगानावात् प्रयोजनमभिधेयं। चाव क्षिप्यते तयोः कि २३
मिह विवक्षितमित्याकांक्षायामभिधेयमत्र विवक्षितमित्याशयेनाह। अर्थेक्येत्यादि। तिशकां॥

क्षइति।अधिकाकांक्षारहितःयत्रास्थितइति·बोधितः।तथाचपदसमूहिताकांक्षातोऽधिकाकांक्षार
हितंयदेकमभिधेयंसोऽर्थःइतितस्यमुख्यार्थस्यप्रतिपादकोयावान्पदसमुदायस्तदेकंवाक्यमि
त्यर्थः।एवंसत्रांत्रंआख्यायार्थस्यैकत्वंवक्तुमाह।तत्रेत्यादि।अनुषंगाइति।अनुषंगयुक्तामंत्राः॥
आकांक्षाभावेपीति·आकांक्षायाःसत्वेपि।उदाहरणंतु।देवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहु
भ्यांपूष्णोहस्ताभ्यामग्नयेजुष्टंनिर्वपामि।इति।अत्रनिर्वापक्रियाप्रतिपाद्यामुख्यातयातोस्यपदस
मुदायस्यक्रियापर्यंतमेकत्वेवपश्चात्साक्रियासर्वैःपदैःकारकभूतैःसंबध्यतइतिननेदिका।ने
दोदाहरणमाह।सजूरित्यादि।पाठस्तु।सजूरृतुभिःसजूर्विधाभिःसजूरुद्रैःसजूरादित्यैःसजूर्
विश्वैर्देवैःसजूर्देवैःसजूर्देवैर्वयोनाधैरिति।एतेषुवसुरुद्रादित्याविश्वेदेवादेवाश्चेतिपंचधाना
र्थेभूताइतितत्प्रतिपादकत्वात्संचमंत्राः।पंचानांविनियोगइष्टकोपधाने।कल्पसूत्रादवगम्यते।त
त्रक्रियानप्रधानंतस्यास्तथात्वेऐकमंत्र्यापत्तेः।अतोयएवप्रधान्यमवलंबतेसएवार्थःशाब्दबोध्य

 इति।एवंद्विविधोदाहरणमुक्त्वाअनुषंगभेदोदाहरणमाह।केचनेत्यादि।आददइतिमंत्रःस्फ्यादाने
विनियुक्तः।तस्मिन्देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामित्यादिनांगेनुषंगः।संहि
तइत्यादिपुरोरुङ्मंत्रेषुते।सजूरित्यादिषुसजूःऋतुभिःसजूर्विधाभिरितिसर्वेनांगेनानुषंगः।सजूर्देवै
र्वयोनाधैरित्यंतेनुषंगइत्युन्नयत्र।यथाचानुषंगयुक्तेषुब्राह्मणादेरनिर्णायकत्वादयमेकवाक्यत्व
ज्ञानोपायइत्यर्थः।उत्तरदलमवतारयति।नन्वित्यादि।ननुयत्रानुषंगोनास्तिमुख्यार्थस्यास्पष्टत्वा
देकार्थतापिसंदिग्धा।यथाइषेत्वेतिमंत्रे।तत्रैकवाक्यत्वज्ञानस्यकउपायः।नचक्रियामध्याहृत्यत
स्यामुख्यत्वंकल्पयित्वैकवाक्यत्वमर्थैक्यात्संपादनीयमितियुक्तं।क्रियायात्वार्थिकीयाकाविदायाता
त्वनिश्चयेतितस्याःप्राधानस्यायुक्तत्वात्।नापिब्राह्मणेननिश्चयः।इषेत्वोर्जेत्वास्वाहा।इषमेवोर्जंय
जमानेदधातीतिसंदिग्धं।अतःसंदिग्धत्वादेवकल्पसूत्रेआपस्तंबेनचस्वैकमनुदायभेदेनद्वेधावि
नियोगउक्तः।इषेत्वोर्जेत्वेतितामाछिनत्त्यपिवेषेत्वेत्याछिनत्त्यूर्जेत्वेतिसंनामयत्यनुमार्ष्टिवेति।संना

मनसृजूकरणं। अत्रतु मार्जनमात्रं तु लोम्नेनु संलग्न धूलस्याप्यपनयनं। नचबोधायनेन मष्टुदायपक्ष्म(
एवगृहीत इति कृपिद्वयैकमत्यस्य ब्राह्मणस्य च सामंजस्यादुत्तरस्मादिनेति न्यायेनैकः एव मंत्रोऽस्त्वि
तियुक्तं। तथा समितिकल्पसूत्रेऽप्यापस्तंबेन इषेत्वोपवीरसीत्यत्र विनियोगांतरं यदुक्तं ईषे त्वेति बर्हिषी
उपादत्ते उपवीरसीति सद्गशाखाबर्हिर्भ्यां प्रस्तृत्रा स्वया च वत्सचं पशुमुपाकरोतीति तत्र ऊर्जे त्वेम
न्यागछेन्मंत्रस्यैकत्वादत्तस्याहरोस्तु लेप्सर्वोक्तरीत्यानिर्णियाताबाकागतिरित्याकांक्ष्यां तत्रापि वि
ऐमार्थे नियामकमाहेत्यर्थः। व्याकुर्वंति। एकदेशत्वादि। पूर्वस्योत्तरस्य वा एकदेशस्य विनज्य कथनेऽ(
यत्र पूर्वस्योत्तरसाकांक्षतात्तरस्य पूर्वसाकांक्षता वा तत्रोभयं मिलित्वैकं वाक्यं। तदन्नावेतु नयं भिन्नं
। प्रकृते तु न साकांक्षतेति इषेत्वेत्येकं। ऊर्जे त्वेत्यपरमिति वाक्यद्वयमेवेत्यर्थः। अधिकरणमालायां(
तु। एकार्थप्रतिपादकत्वे सति विभागे साकांक्षं वाक्यमेकवाक्यमित्युक्तं। आद्यद्वयोक्तौ न गौणं वि
नततु। कृषावां विनज्य त्विति मंत्रद्वयेति व्याप्तिः। उभयोस्तात्पर्यविषयस्यैक्याद्विभागरूपस्यार्थस्यैक

२५ त्वात्। द्वितीयमन्त्रे स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन्त्सीदामृते प्रति
तिष्ठ व्रीहीणां मेधः सुमनस्यमान इति मंत्रद्वये तिष्ठामिः। पूर्वमंत्रे तदिति परस्पराकांक्षायाः सत्वाद्विती
देन व्रीहीणां मेध इत्याकांक्षते। द्वितीये च तस्मिन्निति स्योनेन सदनमाकांक्षत इति परस्पराकांक्षायाः सत्वा
दिति। वस्तुतस्तु नेदं लक्षणं किंतु नियामकमात्रकथनं। न च नगोवामित्यादावेकमंत्रापत्तिः वृत्तसमा
प्त्याः समतायाः नेदिकायाः सत्वात्। नापि स्योनं त इत्यत्र तदापत्तिः उत्तरस्यादिनेतिन्यायेन विनि
योगविधिनैव भेदसिद्धेरिति॥ ३॥ ॥समेषु वाक्यभेदः स्यात्॥ ॥एकार्थप्रतिपादिकं विभज्यमानप
दसाकांक्षं चेद्यावत्पदजातं तावदेकं वाक्यमिति वाक्यपरिमाणज्ञानप्रकार उक्तः तेन देवस्य त्वेत्यादेः
परिमाणं ज्ञातुं शक्यं। क्रियादेवतादिरूपैकार्थप्रतिपादकस्य परस्य सत्वात्। यत्र पुनर्वाचनिकं विनि २५
योगैक्यं परस्परनिराकांक्षता च यथा पृथिव्यामित्यादिमंत्रेषु। तत्र परिमाणज्ञानार्थमधिकरणांतरं इ
त्याशयेनाह। पृथिव्यास्त्वादिसंदेहबीजमाह। अत्रेत्यादि। केशिनादीक्षामिति। देवेषु त्रयः केशिनः स्व

ग्निर्वायुरित्यादिष्विति शाखांतरे प्रसिद्धं तत्संबंधित्वादेते मंत्राः केचिन्नानादीक्षेतिरूत्रिम्यायेनगोप्याः
उच्यंते तामित्यर्थः।संदेहाकारमाह।किमित्यादि।तथा च विनियोगैक्ये नैकार्थप्रतिपादकत्वात्।
एकस्यैकस्याप्यजपमंत्रत्वस्याभावेन साकांक्षत्वाच्च एकत्वतत्तद्देवताप्राधान्यप्रकाशादनेकत्वाद्वि
तीयपक्षे संदेहांतरमाह।अनेकत्वइत्यादि पूर्वपक्षमाह।दीक्षयामीत्यादि।दीक्षयामीत्यंतं वाक्य
चतुष्टयं चेदेको मंत्रः स्यात्।तदा तत्पात्वादीक्षया दीक्षयामीति चतुर्थवाक्यमनुषंगः स्यात्।तस्यार्थव
त्त्वेन सर्वत्र योजयितुं शक्यत्वात्।न चैष प्राप्तिः।तथा च प्रमंत्रे नावर्तेत।अयं तु देवस्य त्वेति वदता दोसमा
वा त्विति वक्तव्ये तेसमूरिति वक्ता घेतथोः प्रतीयनानुषंगः।किंतु मंत्रांतरं।तथा च प्रतिवाक्यमेकैक
पदार्थप्रतिपादनात्प्रतिवाक्यं मंत्र इति पूर्वपक्षे प्राप्त इत्यर्थः।अत्र समाधत्ते।उच्यत इत्यादि।उ
त्तरत्रेति।यंतरिक्षं दाहाघोदीक्षेत्यादिषु।अन्योन्यं पदार्थाभेदादिति।आद्यमवाक्यस्थैस्तपायया
तयेति पदैः पृथिव्यादेरेवपरामर्श एपदार्थाभेदात्।अत्रानां कतेतानहीत्यादि।एकैवा त्विति विनियो

२६ गैक्यादेकेवदीरास्तु। तत्राहेति॰ तत्र भेदकमाङ्क्षःत्तकमिति॰ वाक्यांतावधारणार्थमुक्तं॥ ४॥ ॥
॥ अनुषंगो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वात्॰॥ ॥ अनुषंगस्योदाहरणं। या ते अग्न इत्यादि।
तेषां तैत्तिरीयपाठस्तु॰ या ते अग्ने॰ याशया रजाशया हराशया तन्नर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं
त्वेषं वचो अपावधीं स्वाहेति। अत्र प्रथममंत्रे तन्नर्वर्षिष्ठेत्याद्यनुषज्यते॰ द्वितीये या ते अग्न इति पू
र्वे तन्नर्वर्षिष्ठेत्यादि च पश्चादनुषज्यते। तृतीये तु या ते अग्न इति प्रागेवानुषज्यते। शाखांतरे तु॰ या ते
अग्ने याशया तन्नर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा॰ या ते अग्ने रजा
शया॰ या ते अग्ने हराशयेति पाठः। तत्र सर्वमंत्रे सर्वेषां पदानां मत्वात् द्वितीयतृतीयमंत्रावुदाहरणं
॰ अर्थस्तु॰ हे अग्ने या ते अयाशया अयासि रूपायसेशे ते इत्याशया अयसा निर्मिते तस्यर्थः सा तन्न २६
र्वर्षिष्ठा अतिशयेन वृद्धा गह्वरेष्ठा तीव्रा ह्ययो लोहे वस्थिता॰ तया तन्वा उग्रं वचः क्षुत्पिपासे उप
पातकं॰ त्वेषं वचो वीरहत्यादि महापातकं च अपावधीः हतवानसीति॰ अनया तनुस्थया अनया विपा सह वा उग्रं वचः

एतच्चैवैरस्यैत्येवंवचइतिचव्याख्यानं। तत्रसर्वेषक्षमाङ्कः तत्रेत्यादि। तथाचतन्नरित्यादिकं यत्रप
ठितं तत्र तदाकांक्षापूरणेन चरितार्थत्वान्निराकांक्षमिति नाग्रिमवाक्ययोः संबद्धता इति प्रधान।
वाक्यवाक्यांतरमेवाप्यस्तु नरग्निमयोः साकांक्षत्वं तल्लौकिकेन यथोचितेन वाक्येन पूरणीयमिति प्रा
प्त इत्यर्थः। समाधिं व्याकुर्वंति। वाक्यस्येत्यादि। तथा च यद्यप्यनुषंगो निराकांक्षस्तथाप्यग्रिमवाक्य
द्वयं साकांक्षं। तत्र लौकिकं यद्यप्यध्याहर्तुं शक्यते। तथापि तदपेक्षया वैदिकेन शेषपूरणं युक्तं वेदो
क्तत्वेन सन्निहितत्वादिति। तैत्तिरीयपाठस्याप्युदाहरणत्वायाह। अनुषंग इत्यादि। तस्यैवेति। तस्यैव
शेषः समाधिं व्याकुर्वंति सर्वेष्वित्यादि। तैत्तिरीयपाठे। या ते अग्न इत्यस्या हृत्स्वनावादेकमंत्रमपि संना
वयितुं शक्यते। तथापि कल्पकारैरनुषंगस्याहतत्वान्मंत्रभेद इत्याशयं बोधयितुं मंत्रेदमधिकर
णमुक्तमित्याशयेनाह। अनुषंगोपीत्यादि। सर्वेषामिति। शेष इत्यर्थः॥ ५॥ ॥ अवयवान्नानुष
ङ्गेनाक्षविदाकांक्षासद्भावेप्यनुषंगेन न वृतास्येतदर्थं सर्वं प्रणयतीति बोधनाय विषयमादा।

बाहुः॥संत इत्यादि।अंगोद्भलयोरिति·ककुदि।अंगोद्भलत्राद्देनककुद्भ्यातइतिमाधवीयेव्याख्याना
त्·अयोपियोगान्नभवतीति·अंगानीतिबहुवचनान्नद्या·प्रतिबद्धइति।सर्वत्रासंबंधेनबुद्धिविपरि
हृतिनंगास्प्रतिबद्धः॥नन्वेतरप्रयोजकं।देवस्यत्वेत्यनुषंगस्यन्यायोव्यवायेप्याददइत्यादिमंत्रेषुदर्श
नादित्यतत्राहुः॥यथेत्यादि।इत्यत्रेति।अस्मिन्मंत्रसंधे।अतोपीति·पृथगनुषंगलिंगादर्शनात्तथाच
नाप्रयोजकमित्यर्थः॥नचयद्यैवंतदात्रेवसोमओषधीनामित्यादिमंत्रपंचकेसमावाविस्तनुषंगो
नस्यादितिवाच्यं।अस्मिन्नुत्सन्नस्मिन्कृत्रइत्यादिरूपस्यास्त्रनुषंगप्रसक्तावव्यवपाठस्यानुषंगबो
धकस्यसत्वात्।आददइत्यादौतुकल्पेदेवस्यत्वेत्यादिरोपसरणाद्वाचनिकोषंगइत्यदोषः॥सिद्धमाः
हुः॥तस्मादित्यादि॥१६॥ ॥इतिश्रीमद्वल्लभनंदनचरणदासानुदासपुरुषोत्तमविरचितंश्री
मदाचार्यविरचितजैमिनीयभाष्यभावार्थपादविवरणंसमाप्तः॥ ॥श्रीरस्तु॥ ॥श्रीः
॥ ॥श्रीमुर्नंनंवतु॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीरूसायनमः॥ ॥श्रीः॥ ॥